# शिक्षाशास्त्री
# प्रथमसत्रार्द्धम्
# पाठ्यक्रमस्य विवरणम्

| क्र सं. Sr.No. | पाठ्यक्रमप्रकाराः Types of Course | सैद्धान्तिकपत्राणि Theory Papers | सैद्धान्तिकाङ्काः Theoretical Marks | समग्रसततमूल्याङ्कनाङ्काः Comprehensive Continuous Evaluation (CCE) Marks | पूर्णाङ्काः Total Marks | श्रेयोऽङ्काः Credits | घण्टाः Hours |
|---|---|---|---|---|---|---|---|
| अनिवार्यपत्राणि (Compulsory Papers) | | | | | | | |
| 1. | Foundation | दर्शनसमाजशास्त्रयोः परिप्रेक्ष्ये शिक्षा | 60 | 40 | 100 | 04 | 64 |
| 2. | Foundation | अधिगमविकासयोः मनोविज्ञानम् | 60 | 40 | 100 | 04 | 64 |
| 3. | Skill | शिक्षणाधिगमयोः शैक्षिकप्रविधिः | 60 | 40 | 100 | 04 | 64 |
| 4. | Foundation | भाषाशिक्षा | 60 | 40 | 100 | 04 | 64 |
| 5. | Skill | शैक्षिकप्रबन्धनम् | 60 | 40 | 100 | 04 | 64 |
| प्रायोगिकम् (Practical's) | | | | | | | |
| 1. | Skill | व्यावसायिकक्षमतोन्नयनम् (EPC-01) (संस्कृतभाषाकौशलविकासः) | - | 100 | 100 | 04 | 64 |
| 2. | Skill | शैक्षणिकगतिविधयः | - | 50 | 50 | 02 | 32 |
| योगः | | | 300 | 350 | 650 | 26 | 416 |

# शिक्षाशास्त्री सत्रार्द्धपाठ्यक्रम:

## प्रथमं सत्रार्द्धम्

श्रेयोऽङ्काः (Credits) = 24+2=26

पूर्णाङ्का: = 500+100+50 =650

| | पूर्णाङ्का: | श्रेयोऽङ्काः |
|---|---|---|
| प्रथमं पत्रम् - दर्शनसमाजशास्त्रयो: परिप्रेक्ष्ये शिक्षा | 100 | 04 |
| द्वितीयं पत्रम् – अधिगमविकासयो: मनोविज्ञानम् | 100 | 04 |
| तृतीयं पत्रम् – शिक्षणाधिगमयो: शैक्षिकप्रविधि: | 100 | 04 |
| चतुर्थं पत्रम् – भाषाशिक्षा | 100 | 04 |
| पञ्चमं पत्रम् – शैक्षिकप्रबन्धनम् | 100 | 04 |
| • व्यावसायिकक्षमतोन्नयनम् (EPC-01) | 100 | 04 |
| • शैक्षणिकगतिविधय: | 50 | 02 |

- ई-कण्टेण्टसर्जनम्
- राष्ट्रियशिक्षानीतेः अवगाहनम्

# प्रथमपत्रम्

# दर्शनसमाजशास्त्रयो: परिप्रेक्ष्ये शिक्षा

श्रेयोऽङ्काः = 04

पूर्णाङ्का: = 100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- उदयमानभारतीयसमाजाधारित-दार्शनिकसामाजिकसांस्कृतिकपरम्पराणाम् आदर्शान् मूल्यानि चाधिगन्तुं शक्नुयु:।
- भारतीयशिक्षायां संवैधानिकव्यवस्थानाम् आत्मसात्करणे समर्था: भवेयु:।
- भारतीयशिक्षाया: बहुमुखविकासस्य दार्शनिकविषयाणामवबोधे समर्था: भवेयु:।
- आधुनिकभारतीयसमाजस्य प्रकृते: ज्ञानमवाप्तुं योग्या: स्यु:।
- शिक्षाया: समसामयिकचिन्तनबिन्दून् सम्प्राप्तुं योग्यताम् अवाप्नुयु:।
- शिक्षा मानवानाममूल्यनिधि: इति अवगन्तुं शक्नुयु:।
- शिक्षासम्बद्धाधिकाराणां विषये प्रबुद्धा: जायेरन्।
- शिक्षाया: दार्शनिकाधारान् बोद्धुं पारयेयु:।
- शिक्षाया: दार्शनिकसामाजिकाधारान् बोद्धुं पारयेयु:।

**अन्विति:-1 भारतीयशिक्षाया: स्वरूपं दर्शनं च**

1.1 शिक्षाया अर्थ:, परिभाषा प्रकार्याणि च।

1.2 शिक्षाया: उद्देश्यानि अभिकरणानि च।

1.3 भारतीयदर्शनसम्प्रत्यय:।

**अन्विति:-2 शिक्षायां चिन्तका: दर्शनानि च (भारतीय-पाश्चात्ययो:)**

2.1 भारतीयचिन्तका:- स्वामिदयानन्द:, गुरुदेवरवीन्द्रनाथठाकुर:, महात्मागान्धी स्वामिविवेकानन्द: च ।

2.2 पाश्चात्यदर्शनसम्प्रत्यय:। पाश्चात्त्यचिन्तका:- प्लेटो, रूसो, पेस्टालॉजी जॉन ड्यूवी च।

2.3 आदर्शवादः, प्रकृतिवादः, यथार्थवादः प्रयोजनवादः च। शिक्षायाम् एतेषाम् अनुप्रयोगः।

**अन्वितिः-3 समाजशास्त्रीयपरिप्रेक्ष्ये शिक्षा**

3.1 शिक्षासमाजशास्त्रम्- अर्थः, उद्भवः विकासश्च।

3.2 शिक्षायाः समाजशास्त्रीयाधाराः सामाजिकपरिवर्तनञ्च।

3.3 प्रजातान्त्रिकी शिक्षा तद्गुणाश्च।

3.4 प्रजातान्त्रिकी शिक्षा राष्ट्रियैकता च।

**अन्वितिः-4 भारतीयसंविधाने शिक्षा**

4.1 भारतीयसंविधाने शिक्षा।

4.2 महिलाभ्यः शैक्षिकावसराः।

4.3 विशिष्टवर्गेभ्यः शैक्षिकावसराः- अनुसूचितजातिः, अनुसूचितजनजातिः अन्यथा सक्षमः च।

सन्दर्भग्रन्थाः (Reference Books)


1. मिश्रः, लोकमान्यः, भारतीयाः शिक्षाशास्त्रिणः, मृगाक्षीप्रकाशनम्,गोमतीनगरम्, लखनऊ
2. द्विवेदी, देवीप्रसादः, प्राच्यशिक्षादर्शनम्, 2/811, विनयखण्ड, गोमतीनगरम्, लखनऊ ।
3. शर्मा, कुलदीपः, भारतीयं शिक्षादर्शनम्, जगदीश-संस्कृत-पुस्तकालयः, जयपुरम्, 2019
4. कछवाहा, विजयपालः; शिक्षादर्शनम्, सन्दर्भप्रकाशनम्, भोपालम्, 2015
5. कछवाहा, विजयपालः; भारतीयाः शिक्षाशास्त्रिणः, रचनाप्रकाशनम्, भोपालम्, 2015
6. पाणिग्राही, निर्मला; शिक्षायाः सामाजिकाधाराः, दिव्यप्रकाशनम्, भुवनेश्वरम्, 2011
7. पाणिग्राही, निर्मला; शिक्षायाः नवीनाधाराः, दिव्यप्रकाशनम्, भुवनेश्वरम्, 2016
8. डा.रामचन्द्रुल बालाजी; दार्शनिकी शिक्षाधारा, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, 2013
9. साहू, सोमनाथ; शिक्षायाः दार्शनिकाधाराः, जगदीश-संस्कृत-पुस्तकालयः, जयपुरम्।
10. मिश्रः, रमाकान्तः; भारतीयशिक्षादर्शनम्, चौखम्बा पब्लिकेशन्स, नई दिल्ली।
11. मिश्रः, रमाकान्तः; शिक्षायां दार्शनिकवादाः, चौखम्बा पब्लिकेशन्स, नई दिल्ली।
12. पात्रः, वृन्दावनः, शिक्षणस्य वैज्ञानिकाधाराः, तीरतरङ्गप्रकाशनम्, भुवनेश्वरम्, 2013
13. पात्रः, वृन्दावनः, धार्मिकस्रोतस्सु शिक्षादर्शनम्, दिव्य प्रकाशन, भुवनेश्वर, 2016
14. हरिचन्दन, विद्याधर; भारतीयदर्शनेषु शिक्षा, भारतीय बुक कार्पोरेशन, दिल्ली
15. सिकरवारः, प्रेमसिंहः, शिक्षायाः दार्शनिकसामाजिकाधाराः, एम.बी.पब्लिशर्स एंड डिस्ट्रीब्यूटस्, जयपुरम्।
16. झा, नगेन्द्र; वैदिक शिक्षा पद्धति एवं आधुनिक शिक्षा पद्धति, वेङ्कटेश प्रकाशन, नई दिल्ली।
17. मिश्र, भास्कर; वैदिक शिक्षा मीमांसा, ईस्टर्न बुक लिंकर्स, चन्द्रावल, दिल्ली।

# द्वितीयपत्रम्

# अधिगमविकासयो: मनोविज्ञानम्

श्रेयोऽङ्काः = 04

पूर्णाङ्का: =100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- अधिगन्तृरूपेण बालकस्य विकासं ज्ञातुं मनोविज्ञानस्य प्रयोगे समर्था: स्यु:।
- मनोविज्ञान-शिक्षामनोविज्ञानयो: विभिन्नताया: अवगमने योग्या: भवेयु:।
- अधिगमस्य प्रकृतिप्रक्रिययो:, अधिगमप्रभावोत्पादककारकाणां च अवगमने योग्या: भवेयु:।
- वैयक्तिकभिन्नताम् अवगन्तुं शक्नुयु:।
- अभिप्रेरणाया: अधिगमप्रक्रियायाश्च अवगमने समर्था: जायेरन्।
- बुद्धे: मानसिकप्रक्रियां ज्ञातुं समर्था: स्यु:।
- व्यक्तित्वस्य प्रकृते: अवबोधं, मानसिकस्वास्थ्यस्य मानसिकारोग्यस्य च महत्त्वं जानीयु:।

अन्विति:-1 शिक्षामनोविज्ञानम्

1.1 शिक्षामनोविज्ञानस्य सम्प्रत्यय:, उद्भव: विकासश्च।

1.2 शिक्षामनोविज्ञानस्य उद्देश्यानि क्षेत्रं च।

1.3 संस्कृतवाङ्मये मनोविज्ञानम्।

1.4 शिक्षामनोविज्ञानस्य अध्ययनपद्धतय:-अन्तर्दर्शनविधि:, अवलोकनविधि:, प्रायोगविधि:, व्यक्तिवृत्ताध्ययनविधि: उपचारात्मकविधि: च।

**अन्वितिः-2 अधिगन्तुः अभिवृद्धिविकासयोः अवबोधः**

2.1 अभिवृद्धि-विकास-परिपक्वतानां सम्प्रत्ययः।

2.2 वंशानुक्रमः वातावरणं च।

2.3 विकासस्य अवस्थाः शैक्षिकनिहितार्थः च- शैशवावस्था, बाल्यावस्था किशोरावस्था च। (शारीरिक-मानसिक-सांवेगिक-सामाजिक-विकाससन्दर्भे)

**अन्वितिः-3 अधिगमः अभिप्रेरणा च**

3.1 अधिगमस्य सम्प्रत्ययः।

3.2 अधिगमसिद्धान्ताः, तेषां शैक्षिकनिहितार्थाश्च।

3.3 थार्नडाइक् - सम्बन्धवादः।

3.4 पावलॉव - शास्त्रीयानुबन्धनम्।

3.5 स्किनर - क्रियाप्रसूतानुबन्धनम्।

3.6 गेस्टाल्ट् - अन्तर्दृष्टिसिद्धान्तः।

3.7 अधिगमस्य प्रभावोत्पादककारकाणि।

3.8 अधिगमस्थानान्तरणम्।

3.9 अभिप्रेरणायाः सम्प्रत्ययः।

3.10 अभिप्रेरणाचक्रम्, अभिप्रेरणायाः प्रकाराः- आन्तरिकी बाह्या च।

3.11 अभिप्रेरणा-अधिगमयोः सम्बन्धः।

**अन्वितिः-4 बुद्धिः, व्यक्तित्वं वैयक्तिकभिन्नता च**

4.1 बुद्धिः- सम्प्रत्ययः, प्रकाराश्च। बुद्धिसिद्धान्ताः।

4.2 बुद्धेः मापनं साधनानि च।

4.3 व्यक्तित्वम्- सम्प्रत्ययः, निर्धारकाः, प्रकाराः प्रभावककारकाणि च।

4.4 व्यक्तित्वसिद्धान्ताः।

4.5 प्रक्षेप-प्रक्षेपेतरप्रविधिभिः व्यक्तित्वस्य आकलनम्।

4.6 वैयक्तिकभिन्नताः- सम्प्रत्ययः शैक्षिकनिहितार्थः च।

## सन्दर्भग्रन्था: (Reference Books)


1. मिश्र:, लोकमान्य:; आधुनिकं शिक्षामनोविज्ञानम्, मृगाक्षीप्रकाशनम्, 5/113, विरामखण्ड, गोमतीनगरम्, लखनऊ 2013
2. सिंह: फतेह:; शिक्षामनोविज्ञानम्, आदित्यप्रकाशनम् , जयपुरम् , 2005
3. जे., भानुमूर्ति:, अधिगमस्य मनोवैज्ञानिकाधार:, राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसर:, भोपालम्।
4. तिवारी, नीलाभ:, जैन:, नितिनश्च, भारतीयशिक्षामनोविज्ञानम्, राष्ट्रियसंस्कृतसंस्थान भोपाल- परिसर, 2015
5. तिवारी, नीलाभ:, शिक्षणाधिगमप्रक्रियायै सूचनासम्प्रेषणप्रविधि:, राष्ट्रियसंस्कृतसंस्थान भोपाल- परिसर, 2017
6. तिवारी, नीलाभ:, शिक्षामनोविज्ञानम्, सन्दर्भ प्रकाशन ,भोपाल, 2019
7. बि. पद्ममित्रश्रीनिवास:, शिक्षाया: मनोवैज्ञानिकाधारा:, जगदीश संस्कृत पुस्तकालय, जयपुर 2012
8. डा. नारायणवैद्य:; अधिगमप्रकाशनम्, मान्यताप्रकाशनम्, नई दिल्ली, 2014
9. मित्तल, सन्तोष एवं मित्तल, दीपशिखा, बालविकास एवं पारिवारिक सम्बन्ध, यूनिवर्सिटी बुक हाउस, जयपुर, 2006
10. मंगल, एस.के., शिक्षा मनोविज्ञान, प्रकाशब्रदर्स, लुधियाना
11. सुलैमान, मुहम्मद; उच्चतर शिक्षामनोविज्ञान, मोतीलाल बनारसीदास, नई दिल्ली, 2002
12. गुप्ता, एस.पी., उच्चतर शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, यूनिवर्सिटी रोड, इलाहाबाद

# तृतीयपत्रम्
# शिक्षणाधिगमयो: शैक्षिकप्रविधि:

श्रेयोऽङ्का: = 04

पूर्णाङ्का: = 100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- मनोवैज्ञानिक-सामाजिक-सांस्कृतिक-ज्ञानात्मकदृष्ट्या अधिगमप्रक्रियाम् अवगच्छेयु:।
- विद्यालये विद्यालयाद् बहि: च अधिगमाधिगन्त्रो: विषये अवगच्छेयु:।
- सम्प्रेषणप्रक्रियां प्रभावशीलतया ज्ञातुम् अनुप्रयोक्तुं च क्षमा: स्यु:।
- प्रविधे: विकासमाध्यमेन दृश्यश्रव्योपकरणानां निर्माणं, तदुपयोगञ्च जानीयु:।

**अन्विति:-1 शैक्षिकप्रविधि:**

1.1 शैक्षिकप्रविधे: अर्थ:, उद्देश्यानि, क्षेत्रम् उपयोगिता च।

1.2 उपागमा:- यन्त्रांशोपागम:, तन्त्रांशोपागम: प्रणाली-उपागम: च।

1.3 शाखा:- व्यवहारप्रविधि:, अनुदेशनप्रविधि: शिक्षणप्रविधि: च।

1.4 शिक्षणाधिगमप्रक्रियायाम् अध्यापकस्य भूमिका- ज्ञानस्य विनियोजक:, आदर्श:, सौविध्यकर्ता सहाध्यायी च।

**अन्विति:-2 अधिगम: शिक्षणं च**

2.1 अधिगम: - परिचय:, अधिगमप्रक्रिया, आयामा: (ज्ञानम्, कौशलानि, मूल्यानि, विश्वासा:, अभिरुचय: अभ्यासा: च)।

2.2 अधिगमस्य उद्दीपक-अनुक्रिया (S.R.) सिद्धान्त:, अनुक्रिया-उद्दीपक (R.S.) सिद्धान्त:- प्रासङ्गिकता अनुप्रयोग: च।

2.3 शिक्षणम्- अर्थ:, उद्देश्यानि, प्रक्रिया, स्तरा: शिक्षणाधिगमयो: सम्बन्धश्च।

2.4 शिक्षणाधिगम:- योजना, सङ्घटनम्, नेतृत्वम् नियन्त्रणं च।

अन्विति:-3 सूचना सम्प्रेषणं च

3.1 सूचनासम्प्रेषणस्य अर्थ:, आवश्यकता विशेषताश्च।

3.2 सम्प्रेषणस्य सिद्धान्ता:, प्रक्रियाभेदा:, बाधा: तासां निवारणं च।

3.3 ई संसाधनानि- अन्तर्जालम् (Internet), ई-मेल (e-mail), अन्तर्जालविहार: (Internet Browsing) इत्येतेषां व्यावहारिकं ज्ञानम्।

3.4 ई-अधिगम: (e-Learning) संगणकसहकृतबोधनम् अधिगम-प्रबन्धन-प्रणाली (Learning Management System) च।

अन्विति:-4 शैक्षिकप्रविधौ नूतनप्रविधय:

4.1 सूक्ष्मशिक्षणम् शिक्षणकौशलानि च - प्रस्तावना, प्रश्नकरणम्, व्याख्यानम्, उद्दीपनपरिवर्तनम् श्यामपट्टस्य अनुप्रयोग: च।

4.2 अभिक्रमिताधिगम: - विकास:, अर्थ:, आवश्यकता, प्रकारा: रेखीय: शाखीयश्च ।

4.3 दलशिक्षणम्- अर्थ:, विकास: उद्देश्यानि च।

सन्दर्भग्रन्था: (Reference Books)


1. शर्मा, सुदेशकुमार:, शैक्षिकप्रविधिशास्त्रम्, दीपमाधवप्रकाशनम्, जयपुरम्, 2006
2. पाण्डेय:, एस.एल्., शिक्षणस्यायोजनप्रविधि:, अक्षरप्रकाशनम्, जयपुरम्, 2006
3. प्रो.के के शैन्; शिक्षायां क्रियात्मकानुसन्धानम्, मान्यता प्रकाशन, दिल्ली, 2013
4. पाणिग्राही, निर्मला; शैक्षिकप्रविधिशास्त्रम्, दिव्य प्रकाशन, भुवनेश्वर, 2016
5. पाणिग्राही, निर्मला; शिक्षायां नव्यप्रवृतय:, दिव्य प्रकाशन, भुवनेश्वर, 2016
6. मिश्र:, रमाकान्त:, शैक्षिकप्रविधि:, चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी, 2006
7. पात्र:, वृन्दावन:, कक्षासंप्रेषणम्, तीरतरङ्गप्रकाशनम्, भुवनेश्वर
8. पात्र:, वृन्दावन:, सूचनासंप्रेषणप्रविधि:, दिव्य प्रकाशन, भुवनेश्वर, 2016
9. डा.अशोककुमारकछवाह:; शिक्षणाधिगमयो: सूचनासम्प्रेषणप्रविधि:, संदर्भप्रकाशनभोपालम्, 2019
10. बालाजी, आर, बोधनसमीक्षा, मान्यताप्रकाशनम्, नई दिल्ली, 2010
11. आर.जी. मुरलीकृष्ण, अध्यापककौशलोद्दीपिका, जगदीशसंस्कृतपुस्तकालय:, जयपुरम्।
12. हरिप्रसादः के.; शैक्षिकप्रविधेः मूलतत्वानि, प्रणम्याप्रकाशनम्, 2017
13. महन्त:, जोगेश्वर:; शैक्षिकमूल्याङ्कनम्, तीरतरङ्गप्रकाशनम्, भुवनेश्वर, 2019
14. डा. सागरिका नन्द; संगणकशिक्षा शैक्षिकोपयोगश्च, आई.वाई.डी.पी, खोर्धा, 2014

15. मिश्रः, रुद्रनारायण: नरसिंहः; शैक्षिकप्रविधिः, रचना प्रकाशन, जयपुरम्, 2018
16. डा. नारायणवैद्यः; अधिगमप्रकाशनम्, मान्यताप्रकाशनम्, 2014
17. मित्तल, सन्तोष शैक्षिक तकनीकी एवं कक्षा-कक्ष प्रबन्ध, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर आठवाँ संस्करण 2016
18. कुलश्रेष्ठ, एस.पी., शैक्षिक तकनीकी के मूल आधार, विनोदपुस्तक मन्दिर, आगरा, 2009
19. वालिया,डॉ.जे.एस.; सूचना सम्प्रेषण एवं शिक्षा तकनीकी, अहम् पाल पब्लिशर्ज, जालन्धर , 2014

# चतुर्थपत्रम्

## भाषाशिक्षा

श्रेयोऽङ्काः = 04

पूर्णाङ्काः =100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापकाः-

- भाषाशिक्षणनियोजनयोः प्रकृतिं, कार्याणि अनुप्रयोगांश्च जानीयुः।
- भाषाविज्ञानस्य प्रासङ्गिकताम् अवगच्छेयुः।
- भाषायाः विविधभूमिकाः अवगच्छेयुः।
- भाषाधिगमशिक्षणयोः मनोविज्ञानम् अवगच्छेयुः।
- भारते भाषायाः स्थितिम् अधिगन्तुं पारयेयुः।
- भाषाधिगमस्य वैयक्तिकीकरणम्, अभिक्रमिताधिगमादीन् चावबुध्येरन्।

**अन्वितिः-1 भाषा भाषाविज्ञानं च**

1.1 भाषायाः अर्थः प्रकृतिश्च।

1.2 भाषायाः उद्गमः विकासः च।

1.3 भाषाध्ययनम्।

1.4 भाषाविज्ञानस्य अर्थः, अङ्गानि प्रासङ्गिकता च।

1.5 भाषायाः वर्गीकरणम्। विविधभाषापरिवाराः।

**अन्वितिः-2 विद्यालयः भाषा च**

2.1 गृहभाषा विद्यालयीयभाषा च।

2.2 अधिगमे भाषायाः केन्द्रीकरणम्।

2.3 बहुभाषीयकक्षाः।

अन्विति:-3 भारते भाषाया: स्थिति:

3.1 संविधाने भाषासम्बन्धिन्यः नीतय: (अनुच्छेदा:-343-351) संविधानस्य अष्टमानुसूची प्रान्तीयभाषा: च।

3.2 भारते सम्पर्कभाषा राजभाषा च।

3.3 भारते संस्कृतभाषाया: स्थिति:।

अन्विति:-4 शिक्षाऽऽयोगेषु शिक्षानीतिषु च भाषा

4.1 विविधायोगेषु भाषा- राधाकृष्णन्-मुदलियार-कोठारी-आयोगानां सन्दर्भे।

4.2 प्रथमशिक्षानीति: 1968,

4.3 राष्ट्रियशिक्षानीति: 1986 तदीया कार्ययोजना 1992 च।

4.4 राष्ट्रियशिक्षानीतिः 2020

सन्दर्भग्रन्था: (Reference Books)

1. मिश्र:, लोकमान्य:; भाषाशिक्षा, मृगाक्षी प्रकाशन, लखनऊ, 2022
2. शर्मा, कुलदीप:, संस्कृतशिक्षणदीपिका, केन्द्रीयसंस्कृतविश्वविद्यालय:, नई दिल्ली, 2022
3. शर्मा, कुलदीप:, संस्कृतशिक्षणभूमिका, केन्द्रीयसंस्कृतविश्वविद्यालय:, नई दिल्ली, 2022
4. शर्मा, कुलदीप:, सचित्रं प्रहेलिकाशतकम्, आइडियल पब्लिकेशन, जौहरी बाजार, जयपुर , 2019
5. तिवारी, नीलाभ, संस्कृतप्रबोधिनी , मध्यप्रदेशसंस्कृत बोर्ड, भोपालम्, म. प्र., 2007
6. शर्मा, अपूर्व:; शिक्षकसंदर्शिका, प्रथम: द्वितीय: भाग:, संस्कृत संवर्धन प्रतिष्ठान, नई दिल्ली
7. शर्मा, अपूर्व:; अभ्याससरिणी संस्कृतसम्भाषणम्, संस्कृत संवर्धन प्रतिष्ठान, नई दिल्ली
8. शर्मा, अपूर्व:; अभ्याससरिणी संस्कृतव्याकरणम्, संस्कृत संवर्धन प्रतिष्ठान, नई दिल्ली
9. साहू ,:डॉ ,:शैक्षिकशब्दावलि ;सोमनाथ.सरस्वती पब्लिकेशन2018 ,जयपुर ,
10. साहू ,:डॉ ;सोमनाथ.शैक्षिकपरिभाषाकोश ,:सरस्वती पब्लिकेशन2018 ,जयपुर ,
11. द्विवेदी, कपिलदेव:, भाषाविज्ञान एवं भाषाशास्त्र, त्रयोदश संस्करण, विश्वविद्यालय प्रकाशन, वाराणसी, 2012
12. श्रीवास्तव, रवीन्द्रनाथनाथ, भाषा शिक्षण, वाणी प्रकाशन, दरियागंज नई दिल्ली

# पञ्चमपत्रम्
# शैक्षिकप्रबन्धनम्

श्रेयोऽङ्काः = 04

पूर्णाङ्का: =100

**उद्देश्यानि-**

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- शैक्षिकप्रबन्धनस्य आवश्यकतावगमने समर्था: भवेयु:।
- शिक्षाप्रबन्धनोपागमानां विवेचने शक्ता: भवेयु:।
- कक्षाव्यवस्थापने समस्यानिवारकोपायानामवबोधने च योग्या: भवेयु:।
- भौतिकसंसाधनानां सूचीकरणे, तेषां च सज्जीकरणोपायानां विश्लेषणे समर्था: जायेरन्।
- विद्यालये उत्तमवातावरणनिर्माणे शिक्षकाणां, प्राचार्याणां च भूमिकाया: विवरणे समर्था: भवेयु:।

**अन्विति:-1 शैक्षिकप्रबन्धनम्**

1.1 प्रबन्धनस्य सम्प्रत्यय:

1.2 शैक्षिकप्रबधनम्, आवश्यकता उद्देश्यानि च।

1.3 शैक्षिकप्रबन्धनस्य सिद्धान्ता:।

1.4 शैक्षिकप्रशासनप्रबन्धनयो: संस्थानम् (NIEPA)

**अन्विति:-2 विद्यालयसमयसारिणी**

2.1 समयसारिण्या: सम्प्रत्यय:, महत्त्वं प्रकाराश्च ।

2.2 विद्यालयसमयसारिणी, कक्ष्यासमयसारिणी शिक्षकसमयसारिणी चेति।

2.3 पाठ्यसहगामिक्रियाणां महत्त्वं प्रबन्धनं च।

**अन्विति:-3 मानवसंसाधनानि**

3.1 प्रधानाध्यापक:- विशेषता:, कर्तव्यानि उत्तरदायित्वानि च।

3.2 शिक्षका:- विशेषता:, कर्तव्यानि उत्तरदायित्वानि च।

3.3 अध्यापकाभिभावकसङ्घः।

अन्वितिः-4 भौतिकसंसाधनानि

4.1 विद्यालयभवनं तत्प्रारूपप्रकाराश्च।

4.2 कक्ष्याकक्षः, पुस्तकालयः, प्रयोगशाला, कार्यालयः, शिक्षककक्षः, सङ्गणकप्रयोगशाला, क्रीडाङ्गणं छात्रावासः च।

4.3 विद्यालयोपस्करणानि (Furniture)।

सन्दर्भग्रन्थाः (Reference Books)


1. मित्तलः, सन्तोष; सिंहः, फतेहः; विद्यालयप्रशासनं सङ्घटनञ्च (अनूदितग्रन्थः), राष्ट्रिय-संस्कृतसंस्थानम्, नई दिल्ली
2. चन्द्रकान्तः, शैक्षिकप्रशासनं नियोजनञ्च, जगदीश संस्कृत पुस्तकालय, जयपुर
3. झा, मदनमोहन; विद्यालयप्रबन्धनम्, श्रुतिप्रकाशनम्, पुरी।
4. पाण्डेय, श्रीगोविन्द , शैक्षिकप्रबन्धनम्, शिवसंस्कृतसंस्थानम् , वाराणसी, 2013
5. पाण्डेय ,श्रीगोविन्द पाण्डेय, दूरस्थशिक्षा, भारतीयज्योतिषम्, भोपालम्, 2016
6. कछवाहः,अशोककुमार, शैक्षिकप्रबन्धनम्, भारतीय ज्योतिषम् प्राइवेट लिमिटेड, लाहरपुर, भोपाल
7. मिश्रः,रमण, शिक्षावल्लरी, वैदिकसेवान्यासः , लखनऊ , 2017
8. शर्मा, माताप्रसादः; शिक्षाप्रशासनम्, आयुर्वेद हिन्दी पुस्तक भण्डार, जयपुर
9. मिश्र, भास्कर; विद्यालय प्रशासन, भावना प्रकाशन, नई दिल्ली
10. झा, रामसेवक, शैक्षिकप्रशासनं पर्यवेक्षणञ्च, हंसा प्रकाशन, जयपुर
11. सुखिया, एस.पी.; विद्यालय प्रशासन एवं संगठन, विनोदपुस्तक मन्दिर, आगरा
12. वर्मा, जे.पी.; शैक्षिक प्रबन्धन, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर
13. ओड़, एल. के.; शैक्षिक प्रशासन, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर

# व्यावसायिकक्षमतोन्नयनम् (EPC-01)
# संस्कृतभाषाकौशलविकास:

श्रेयोऽङ्काः = 04

पूर्णाङ्का: = 100

उद्देश्यानि-

- संस्कृतशिक्षकव्यवसायार्थं प्रशिक्षणं लभमानाः छात्राध्यापिकाध्यापकाः संस्कृतेन सरलतया सहजतया साधुतया च अभिव्यक्तिक्षमाः भवेयुः।
- सरलमानकसंस्कृतस्य स्वरूपमवबुध्य संस्कृतमाध्यमेन संस्कृतशिक्षणं कर्तुं कुशलतां लभेरन्।
- सरलसंस्कृतभाषया लैखिकाभिव्यक्तये अभ्यस्ताः भवेयुः।

❖ विशेषः- अस्मिन् चत्वारः श्रेयोऽङ्काः (4 Credits) सन्ति। प्रति क्रेडिट्स 16 घण्टाः तत्र (14) घण्टासु बोधनं अभ्यासः। (02) घण्टाद्वये परीक्षणम्।

गतिविधिः-1

श्रेयोऽङ्काः ( क्रेडिट्स )- 1

पूर्णाङ्काः = 25

- संस्कृतगीत-संवाद-श्लोकादिश्रावणेन श्रवणसंस्कारः निर्धारितः।
- संरलमानकसंस्कृतम्-इत्यस्य परिचयः।

  (केन्द्रीय-संस्कृत-विश्वविद्यालयेन (नवदेहली) प्रकाशितं पुस्तकमत्र- स्रोतः)
- सम्भाषणशिविरस्य परिचयः- सम्भाषणशिविरस्य पाठयक्रमः, शिक्षणसरणिः (उपस्थापनम्-अभ्यासः प्रयोगश्च) दशदिवसात्मकस्य (प्रतिदिनं घण्टाद्वयं) सम्भाषणशिविरस्य आयोजनं विद्याशाखायाम् स्यात्।

  (सत्रार्द्धस्य प्रथममासे एतस्य गतिविधेः आयोजनानन्तरं सपदि एव मूल्याङ्कनं विधाय प्रतिफलानि शिक्षाशास्त्रशाखाध्यक्षाय समर्पणीयानि)

गतिविधिः-2 श्रेयोऽङ्काः (Credits)-01

सुबन्तपदानामभ्यासः विभक्त्यनुसारम् अजन्तहलन्तशब्दानां रूपाणामभ्यासः-

- अजन्तशब्दाः
- अकारान्तः पुँ./नपुं.
- आकारान्तः स्त्री.
- इकारान्तः त्रिषु लिङ्गेषु
- ईकारान्तः स्त्री.
- उकारान्तः त्रिषु लिङ्गेषु
- ऊकारान्तः स्त्री.
- ऋकारान्तः त्रिषु लिङ्गेषु
- ओकारान्तः पुँ./स्त्री.
- हलन्तशब्दाः
- चकारान्तः पुँ./स्त्री.
- जकारान्तः पुँ./स्त्री.
- तकारान्तः त्रिषु लिङ्गेषु
- दकारान्तः त्रिषु लिङ्गेषु
- नकारान्तः त्रिषु लिङ्गेषु
- सकारान्तः त्रिषु लिङ्गेषु
- षकारान्तः त्रिषु लिङ्गेषु
- तिङन्तपदानामभ्यासः (सरलव्यवहारोपयोगिनां तिङन्तानां कतिपयलकाराणामभ्यासः)

- परस्मैपदधातवः -पञ्चसु लकारेषु (लट्, लोट्, लङ्, लृट्, विधिलिङ्लकाराः)

  भू, पठ्, पा, पत्, लिख्, वद्, दृश् (पश्य), खाद्, गम्, धाव्, हस्, प्रच्छ, जागृ, भी, रुद्, नी, हृ, छिद्, भिद्, क्रीञ्´, चुर्, कृ, ज्ञा, दा, शक्, जन्, ब्रू।
- आत्मनेपदधातवः - पञ्चसु लकारेषु (लट्, लोट्, लङ्, लृट्, विधिलिङ्लकाराः)

  वन्द्, शुभ्, भाष्, वृतु-वर्तने, कम्प्, रभ्, रुच्, दा, कृ, ज्ञा, क्री, अधि+इङ्, आस्, शीङ्, भुज्, युज्।

**(सत्रार्द्धस्य द्वितीयमासे एतस्य गतिविधेः आयोजनानन्तरं सपदि एव मूल्याङ्कनं विधाय प्रतिफलानि शिक्षाशास्त्रशाखाध्यक्षाय समर्पणीयानि)**

गतिविधिः-3 श्रेयोऽङ्काः (Credits)-01

कृदन्तपदानामभ्यासः क्त, क्तवतु, कत्वा, ल्यप्, तुमुन्, तव्य, अनीयर्, ल्युट्, शतृ, शानच् इत्यादिकृत्प्रत्ययान्तपदानाम् अभ्यासः।

- कारकस्याभ्यासः विभक्त्यर्थप्रयोगाभ्यासः कतिपयतद्धितप्रत्ययानामभ्यासः (अपत्यार्थकम् अण्, मतुप्, वतुप्, तल् इत्यादीनामभ्यासः)
- वाच्यपरिवर्तनस्याभ्यासः विशेष्यविशेषणभावाभ्यासश्च।

  (द्वितीयदीक्षया व्यवहारप्रदीपस्य द्वितीयभागस्य आधारेण बोधनमभ्यासञ्च कारयितुं शक्यते)
- सङ्ख्यासङ्ख्येयपदानामभ्यासः (एकतः शतं यावत्)

  (द्वितीयदीक्षयाः व्यवहारप्रदीपस्य द्वितीयभागस्य आधारेण बोधनमभ्यासञ्च कारयितुं शक्यते)
- उच्चारणाभ्यासः वाचनाभ्यासश्च। दीक्षापुस्तकानां पाठानां क्रमशः वाचनाभ्यासं,शुद्धोच्चारणाभ्यासञ्च कारयितुं शक्यते।

  (सत्रार्द्धस्य तृतीयमासे एतस्य गतिविधेः आयोजनानन्तरं सपदि एव मूल्याङ्कनं विधाय प्रतिफलानि शिक्षाशास्त्रशाखाध्यक्षाय समर्पणीयानि)

**गतिविधिः-4** **श्रेयोऽङ्काः -01**

आशुभाषणम् सान्दर्भिकभाषणं च प्रतिसप्ताहम् एकस्मिन् कालांशे छात्राध्यापकानां संख्यानुगुणं कालांशे यावतां भवितुमर्हति तावतां निमेषत्रयं आशुभाषणाय लधवः विषयाः पत्रखण्डेषु प्रस्तोतव्याः। मासे एकवारं एकस्मिन् कालांशे प्रत्येकस्मै छात्राध्यापकाय सन्दर्भमेकं प्रस्तुत्य भाषणं कारयितव्यम् ।

आशुलेखनम्। (चित्रवर्णनम्, प्रदत्तशब्दानां प्रयोगेण कथालेखनम्, प्रसिद्धपुरुषाणां नामश्रवणेन परिचयात्मकम् अनुच्छेदलेखनम्)

अभ्याससामग्रीणां निर्माणम्। (सम्भाषणशिविरसञ्चालनयोग्यसामग्रीनिर्माणम्, यथा-स्फोरकपत्राणि वर्णपत्राणि, सारिणीनिर्माणम्, रेखाचित्रनिर्माणम्)।

व्यावहारिकशब्दकोषनिर्माणम् - वर्णमालाक्रमेण व्यावहारिकान् दश शब्दान् प्रदाय तेषां शब्दानाम् अमरकोषादिग्रन्थेभ्यः पर्यायपदानां लेखनं प्रत्येक छात्राध्यापकेन कारणीयम्।

**(सत्रार्द्धस्य चतुर्थमासे एतस्य गतिविधेः आयोजनानन्तरं सपदि एव मूल्याङ्कनं विधाय प्रतिफलानि शिक्षाशास्त्रशाखाध्यक्षाय समर्पणीयानि)**

**संस्कृतभाषाकौशलविकास:** - इत्ययं प्रायोगिकविषय: भाविसंस्कृताध्यापकेषु वर्तमानप्रशिक्षणार्थिषु मौखिकाभिव्यक्ते: लेखनाभिव्यक्तेश्च कौशलसंवर्धनाय 'व्यावसायिकक्षमतोन्नयनं' निर्धारित:।

अभ्यासदृष्ट्या चतुर्षु गतिविधिषु विभक्तोऽयं प्रायोगिकविषय: चतुर: श्रेयोऽङ्कान् बिभर्ति। सत्रार्द्धस्यान्ते शतस्य अङ्कानां परीक्षणं भवेत्। तत्र विद्याशाखाया: अध्यक्षस्याध्यक्ष्ये प्रत्येकं छात्राध्यापकस्य/छात्राध्यापिकायाश्च परीक्षणं दृश्याङ्कितं स्यात् ।

परीक्षणस्य स्वरूपमेवं भवेत् –

| | |
|---|---|
| (1) शुद्धोच्चारणाय परीक्षणम् | 10 अङ्का: |
| (2) अनुप्रयुक्त व्याकरणज्ञानम् | 10 अङ्का: |
| (3) श्रुतलेखनकौशलम् | 10 अङ्का: |
| (4) वाचनकौशलम् | 10 अङ्का: |
| (5) अभ्याससामग्रीणां निर्माणम् | 10 अङ्का: |
| (6) अनुवादकौशलम् | 10 अङ्का: |

(वाक्यानाम्, श्लोकानां गद्यखण्डानाञ्च अनुवादलेखनाभ्यासबलेन अनुवादं कारयित्वा मूल्याङ्कनं विधेयम्।)

| | |
|---|---|
| (7) आशुभाषणम्/सान्दर्भिकभाषणम् | 10 अङ्का: |
| (8) शब्दानां पर्यायपदज्ञानपरीक्षणम् | 10 अङ्का: |
| (9) सम्भाषणशिविरसञ्चालनम् | 10 अङ्का: |
| (10) समग्राभिव्यक्ति: | 10 अङ्का: |

## शैक्षणिकगतिविधयः

श्रेयोऽङ्काः = 02

पूर्णाङ्का:=50

1. **ई-कण्टेण्टसर्जनम्**

   प्रत्येकं विषयाधारितं M.S. Word, P.P.T, PDF & Picture formats इत्येतेषां निर्माणस्य ज्ञानम् । प्रत्येकं विषयस्य 02 (PPT) आहत्य 10 (PPT) विनिर्मेयम्।

   (सत्रार्द्धस्य द्वितीये मासे एतस्य गतिविधेः आयोजनानन्तरं सपदि एव मूल्याङ्कनं विधाय प्रतिफलानि शिक्षाशास्त्रशाखाध्यक्षाय समर्पणीयानि)

2. **राष्ट्रियशिक्षानीतेः (2020) अवगाहनम्**

   (सत्रार्द्धस्य चतुर्थे मासे एतस्य गतिविधेः आयोजनानन्तरं सपदि एव मूल्याङ्कनं विधाय प्रतिफलानि शिक्षाशास्त्रशाखाध्यक्षाय समर्पणीयानि)

# शिक्षाशास्त्री
# द्वितीयसत्रार्द्धम्
# पाठ्यक्रमस्य विवरणम्

| क्र.सं Sr.No. | पाठ्यक्रमप्रकाराः Types of Course | सैद्धान्तिकपत्राणि Theory Papers | सैद्धान्तिकाङ्काः Theoretical Marks | समग्रसततमूल्याङ्कनाङ्काः Comprehensive Continuous Evaluation (CCE) Marks | पूर्णाङ्काः Total Marks | श्रेयोऽङ्काः Credits | घण्टाः Hours |
|---|---|---|---|---|---|---|---|
| अनिवार्यपत्राणि (Compulsory Papers) | | | | | | | |
| 1 | Foundation | समसामयिकभारतं शिक्षा च | 60 | 40 | 100 | 04 | 64 |
| 2 | Foundation | अधिगमाकलनम् | 60 | 40 | 100 | 04 | 64 |
| 3 | Skill | शास्त्रशिक्षणम् | 60 | 40 | 100 | 04 | 64 |
| 4 | Skill | संस्कृतशिक्षणम् | 60 | 40 | 100 | 04 | 64 |
| 5 | Elective/ Optional | आधुनिकभाषाशिक्षणम्/ आधुनिकविषयशिक्षणम् (हिन्दी शिक्षण, Teaching of English, मातृभाषाशिक्षण (मलयालम/कन्नड/ ओडिया/बांग्ला/डोगरी/ मराठी चेतैतासु अन्यतमा एका भाषा) समाजिकविज्ञानशिक्षणम् | 60 | 40 | 100 | 04 | 64 |
| प्रायोगिकम् (Practical's) | | | | | | | |
| 1 | Skill | व्यावसायिकक्षमतोन्नयनम् (EPC-02) (शिक्षाभाषाकार्याणि च:) | - | 100 | 100 | 04 | 64 |
| 2 | Skill | शैक्षणिकगतिविधय: | - | 50 | 50 | 02 | 32 |
| योगः | | | 300 | 350 | 650 | 26 | 416 |

# शिक्षाशास्त्री सत्रार्द्धपाठ्यक्रम:

# द्वितीयं सत्रार्द्धम्

श्रेयोऽङ्काः (Credits) = 24+2=26

पूर्णाङ्का: - 500+100+50 =650

| | पूर्णाङ्का: | श्रेयोऽङ्काः |
|---|---|---|
| प्रथमं पत्रम् - समसामयिकभारतं शिक्षा च | 100 | 04 |
| द्वितीयं पत्रम् – अधिगमाकलनम् | 100 | 04 |
| तृतीयं पत्रम् – शास्त्रशिक्षणम् | 100 | 04 |
| चतुर्थं पत्रम् – संस्कृतशिक्षणम् | 100 | 04 |
| पञ्चमं पत्रम् – आधुनिकभाषाशिक्षणम्/आधुनिकविषयशिक्षणम् (हिन्दी शिक्षण, Teaching of English, मातृभाषा शिक्षण(मलयालम/कन्नड/ओडिया/बांग्ला/डोगरी/मराठी चेतैतासु अन्यतमा एका भाषा समाजिकविज्ञानशिक्षणञ्च ) | 100 | 04 |
| व्यावसायिकक्षमतोन्नयनम् (EPC-2) | 100 | 04 |
| शैक्षणिकगतिविधय: | 50 | 02 |

# प्रथमं पत्रम्
# समसामयिकभारतं शिक्षा च

श्रेयोऽङ्काः - 04

पूर्णाङ्का:- =100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- वर्तमानशिक्षायां पूर्वप्रचलितशिक्षाव्यवस्थाया: प्रभावम् अवगच्छेयु:।
- समाजे वैविध्यताम् असमानतां सीमान्ततां शिक्षायां तेषां प्रभावं च अवगच्छेयु:।
- भारते सामुदायिकशिक्षानिमित्तं नीते: संरचनाविषये अवगच्छेयु:।
- स्वातन्त्र्यात्पूर्वकालिकशैक्षिकविषयाणां प्रभाव: समसामयिकविषयेषु नीतिषु कथं भवतीति अवगच्छेयु:।
- भारतीयशिक्षाव्यवस्थाया: भाषामाध्यमस्य पाठ्यचर्यादीनां विषये ज्ञानं सम्पादयेयु:।

अन्विति:-1 प्राचीनमध्यकालिकभारतीयशिक्षाया: व्यवस्था

1.1 वैदिकशिक्षा- स्वरूपम्, उद्देश्यानि, पाठ्यक्रम:,शिक्षणविधय: गुरुशिष्यसम्बन्धश्च।

1.2 बौद्धशिक्षा- स्वरूपम्, उद्देश्यानि, पाठ्यक्रम:, शिक्षणविधय: गुरुशिष्यसम्बन्धश्च।

1.3 मुस्लिमशिक्षा- स्वरूपम्, उद्देश्यानि, पाठ्यक्रम:, शिक्षणविधय: गुरुशिष्यसम्बन्धश्च।

अन्विति:-2 स्वातन्त्र्यात्पूर्वकालिका भारतीयशिक्षा

2.1 प्राच्यपाश्चात्यविवाद:।

2.2 मेकाले-विवरणपत्रम्।

2.3 वुड्-घोषणापत्रम्।

2.4 हण्टर-आयोग:

2.5 वर्धा-शिक्षासमिति:।

## अन्विति:-3 आधुनिकभारतीयशिक्षा

3.1 विश्वविद्यालयशिक्षाऽऽयोग:-1948-49

3.2 माध्यमिकशिक्षाऽऽयोग: - 1952-53

3.3 संस्कृतशिक्षाऽऽयोग: - 1956-57

3.4 भारतीयशिक्षाऽऽयोग: - 1964-66

3.5 राष्ट्रियशिक्षानीति: - 1968

3.6 राष्ट्रियशिक्षानीतिः - 1986 तदीया समीक्षासमितिश्च - 1992

3.7 शिक्षाधिकाराधिनियमा: - 2009

3.8 राष्ट्रियशिक्षानीति: - 2020

## अन्विति:- 4 भारतीयशिक्षाया: समसामयिकसमस्या:

4.1 प्राथमिकशिक्षा-सम्प्रत्यय:, आवश्यकता, उद्देश्यानि, प्राथमिकशिक्षाया: समस्याः समाधानानि च।

4.2 माध्यमिकशिक्षा- सम्प्रत्यय:, आवश्यकता, उद्देश्यानि, समस्या: समाधानानि च।

4.3 उच्चशिक्षा- सम्प्रत्यय:, आवश्यकता, उद्देश्यानि, समस्या: समाधानानि च।

4.4 स्त्रीशिक्षा- सम्प्रत्यय:, आवश्यकता, उद्देश्यानि, समस्या: समाधानानि च।

4.5 अध्यापकशिक्षा- सम्प्रत्यय:, आवश्यकता, उद्देश्यानि, समस्या: समाधानानि च।

## सन्दर्भग्रन्था: (Reference Books)


1. मिश्रः, लोकमान्यः, भारतीया पुरातनी शिक्षा, मृगाक्षीप्रकाशनम्, गोमतीनगरम्, लखनऊ -226010
2. मिश्रः, लोकमान्यः, भारतीया आधुनिकी शिक्षा, मृगाक्षीप्रकाशनम्, गोमतीनगरम्, लखनऊ -226010
3. शैन.के.के ; भारतीयमाध्यमिकशिक्षा, मान्यता प्रकाशन, दिल्ली, 2016
4. शैन.के.के ; भारतीयशैक्षिकसमस्याः, मान्यता प्रकाशन, दिल्ली, 2016
5. पात्रः,बृन्दाबन ;भारते शिक्षाप्रणाल्याः विकासः ,दिव्याप्रकाशनी भुवनेश्वरम् ,2013
6. कछवाहः, अशोककुमार; समसामयिकभारतमं शिक्षा च, संदर्भप्रकाशनभोपालम्, 2019
7. झा, सुरेन्द्रः, प्राचीनभारतीयशिक्षापद्धतिः, 2/212, विराटखण्डः,गोमतीनगरम्, लखनऊ -20
8. पाठक, पी.डी., भारतीय शिक्षा और उसकी समस्याएँ, विनोदपुस्तक मन्दिर, आगरा।
9. रस्तोगी, के.जी., भारतीय शिक्षा का इतिहास एवं समस्याएँ, विनोदपुस्तक मन्दिर, आगरा।
10. अग्निहोत्री, रवीन्द्र; आधुनिक भारतीय शिक्षा : समस्याएँ और समाधान, राजस्थानहिन्दी ग्रन्थ अकादमी, जयपुर,
    2008
11. गुप्त, ईश्वरदयाल; आधुनिक भारतीय शिक्षा समस्या चिन्तन, हरियाणा साहित्य अकादमी, चण्डीगढ़, 1991
12. पाठक, दाताराम; अतीत एवं वर्तमान में शैक्षिक प्रणाली-3-शैक्षिक परिभाषा कोश भाग, (2015) मान्यता प्रकाशन, दिल्ली
13. Govt. of India (1986), National Policy of Education M/o HRD, New Delhi.
14. Govt. of India (1952-53) : Report of the Secondary Education Commission.
15. Govt. of India (1964-66), Education Commission Kothari Commission.
16. Govt of India (2009) : Right to Education, Ministry of Law and Justice.
17. Anand, C.L., (1983) : Teacher and Education in Emerging Indian Society, NCERT, New Delhi.

# द्वितीयपत्रम्
## अधिगमाकलनम्

श्रेयोऽङ्काः - 04

पूर्णाङ्का:- =100

उद्देश्यानि-

**अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-**

- मूल्याकलनमूल्याङ्कनयो: सन्दर्भे विमर्शात्मकावबोधसम्पादने (संरचनोदाहरणत:) समर्था: भवेयु:।
- मुख्यसम्प्रत्ययानां विषये यथा हि - प्रारूप-संकलनात्मकमूल्याकलनं, मूल्याङ्कनं, मापनं परीक्षणानि च अभिजानीयु:।
- अनेकविधसमाकलनसन्दर्भेषु उपकरणत्वेन छात्राधिगमाविष्करणे समर्था: भवेयु:।
- मूल्याकलनोपकरणत्वेन उपयुज्यमानस्य अधिगम-चयन-संरचनादिसम्पादने च समर्था: भवेयु:।
- यथार्थ-समाकलने व्यापक-गत्यात्मक-मूल्याकलनप्रक्रियासु समेषां छात्राणां दृष्टिं समाकर्षयेयु:।

**अन्विति:-1 मूल्याकलनमूल्याङ्कनयो: विहङ्गावलोकनम्**

1.1 संरचनोदाहरणमभिलक्ष्य मूल्याकलनस्यमूल्याङ्कनस्य अधिगमस्य , च सम्प्रत्ययः।

1.2 अधिगमार्थं मूल्याकलनम् अधिगमस्य मूल्याकलनं च इत्यनयो: भेद:।

1.3 प्रकृतमूल्याङ्कनाभ्यासानां विमर्शात्मकसमीक्षणं, तेषाम् अधिगमविकासयोश्च कल्पना।

1.4 सङ्कलनात्मकमूल्याङ्कनम्,- विस्तृतमूल्याङ्कनं श्रेणीकरणं चेति।

**अन्विति:-2 विषयाधारितम् अधिगममूल्याकलनम्**

2.1 विषयाधारिताधिगमस्य पक्षाः।

2.2 मूल्याकलनोपकरणानि।

2.3 सन्दर्भप्रकारा:- परियोजना:, प्रदत्तकार्यं निष्पादनं च।

2.4 परीक्षाप्रकारा: तेषां निर्माणञ्च। आत्म-मूल्याकलनं सहयोगिमूल्याकलनं च।

अन्विति:-3 परीक्षा व्यवस्था-सामाजिक-मनोवैज्ञानिकसम्बद्धविषयाणां विश्लेषणम्

3.1 श्रेणीनिर्धारणाय परीक्षा:।

3.2 सामाजिकचयनाय नियोजनाय च परीक्षा।

3.3 छात्राधिगमे वर्तमानपरीक्षाप्रणाल्या: प्रभाव:।

3.4 परीक्षायां नमनीयतायाः समावेशः आवश्यककार्याचरणं च।

अन्विति:- 4 शिक्षा सांख्यिकी च।

4.1आवृत्तिवितरणं, केन्द्रीयप्रवृत्तेः विविधमापनानि च।

4.2मध्यमानं, मध्याङ्कः, बहुलाङ्कः, प्रामाणिकविचलनं च।

4.3 प्रदत्तानां रेखीयप्रदर्शनम्।

सन्दर्भग्रन्था: (Reference Books)


1. अस्थाना, बिपिन एवं अस्थाना, निधि, शैक्षिक मूल्याङ्कन, अग्रवाल पब्लिकेशन्स, आगरा-2
2. पतिः, डम्बरुधर, शैक्षिकानुसन्धानं संख्याशास्त्रं च, हंसा प्रकाशन, जयपुर-2012
3. मिश्र, रुद्रनारायण नरसिंहः, शिक्षायां सांख्यिकी, अभिषेक प्रकाशन-2015
4. भटनागर, ए. बी. एवं भटनागर, मीनाक्षी, मनोविज्ञान और शिक्षा में मापन एवं मूल्याङ्कन, आर. लाल बुक डिपो, मेरठ।
5. गुप्ता, एस्.पि. एवं गुप्ता, अलका, शैक्षिक मापन एवं मूल्याङ्कन, शारदा पुस्तक भवन, इलाहाबाद
6. Mohan, Letta Ram Dhody, Amrita, Currculum Introduction and Evaluation, Agrawal Publication, Agra
7. Sharma, R.A. Sharma, Advance Statistics in Education and Psychology, R.Lall Book Depot, Merut.
8. Chanda, Dr. S.S. and Rao, Dr. Renu, Education Pychology Evaluation and Statistics, R.Lall Book Depot, Merut.
9. Ebel, Robert L. (1966) Measuring Educational Achievement, Prentice Hall Pvt. Ltd. New Delhi.
10. IGNOU ES-333 Evaluation.

# तृतीयपत्रम्
## शास्त्रशिक्षणम्

श्रेयोऽङ्काः - 04

पूर्णाङ्काः- =100

उद्देश्यानि-

**अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापकाः-**

- शास्त्रसम्प्रत्ययम् अवगच्छेयुः।
- व्याकरण-साहित्य-ज्योतिष-न्याय-मीमांसा-शास्त्राणां सामान्यस्वरूपावगमने योग्यतां सम्पादयेयुः।
- विविधशास्त्रसम्बद्धशिक्षणसरणिम् अवगच्छेयुः।
- व्याकरणशास्त्रस्य शिक्षणविधीन् जानीयुः।
- साहित्यशास्त्रशिक्षणविधीन् अवगच्छेयुः।
- शास्त्रज्ञानपरीक्षणप्रविधीन् परिचिनुयुः।
- शास्त्रसंरक्षणसंस्थाः परिचिनुयुः।

**अन्वितिः-1 शास्त्रसम्प्रत्ययः**

1.1 शास्त्रनिर्वचनम्।
1.2 शास्त्रेषु मङ्गलाचरणपरम्परा।
1.3 शास्त्राध्ययनप्रयोजनम्।
1.4 विभिन्नानि शास्त्राणि।
1.5 अनुबन्धचतुष्टयनिरूपणम्।

**अन्विति:-2 शास्त्रशिक्षणसरणि:**

2.1 अन्वयव्यतिरेकौ।

2.2 अधिकरणम्।

2.3 प्रमाण्यविचारः।

**अन्विति:-3 व्याकरणशास्त्रं साहित्यशास्त्रं च**

3.1 व्याकरणशास्त्रशिक्षणविधयः।

3.2 शिक्षावेदाङ्गे उच्चारणशिक्षणम्।

3.3 साहित्यनिर्वचनं साहित्यशिक्षणविधयश्च।

**अन्विति:-4 शास्त्रज्ञानपरीक्षणप्रविधय:**

4.1 वेदपाठाः-पद-जटादिविविधाः पाठाः।

4.2 प्रहेलिकाः। समस्यापूर्तिः। शलाकापरीक्षा।

## सन्दर्भग्रन्था: (Reference Books)-


1. पण्डा,:शास्त्रशिक्षणविधय ;बिचित्ररञ्जन ,पोद्दार पब्लिकेशन 2017 ,वाराणसी ,
2. जुगरानः, मनीष:केन्द्रीयसंस्कृतविश्वविद्यालयः , शास्त्रशिक्षणम् ,,नवदेहली
3. डा रजनी वी जी; शास्त्रशिक्षणम्, भारतीयज्योतिषम्, भोपालम्, 2018
4. देवनाथ ,.रा :उपाध्याय ;:भुवनेश :व्याकरणशिक्षणविधि,:विद्याभारती 1988 ,वाराणसी ,जगतगंज,
5. मिश्र: लोकमान्य:, साहित्यशिक्षणविधि:, मृगाक्षीप्रकाशनम्, गोमतीनगरम्, लखनऊ 2013 ,
6. लता, एन्, साहित्यशिक्षणम्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:।
7. शुक्ल:, रजनीकान्त:, व्याकरणशिक्षणम्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:।
8. चौधरी, प्रभादेवी, साहित्यशिक्षणम्, गार्गीप्रकाशनम्, दिल्ली।

# चतुर्थपत्रम्
## संस्कृतशिक्षणम्

श्रेयोऽङ्काः - 04

पूर्णाङ्का:- =100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- संस्कृतभाषाया: विकासस्य सांस्कृतिकपरिवेशस्य च अवगमने समर्था: स्यु:।
- माध्यमिकस्तरे संस्कृतपाठ्यपुस्तकानाम् अध्ययने विश्लेषणे च योग्यतां प्राप्नुयु:।
- संस्कृतशिक्षणस्य सिद्धान्तानां सूत्राणाञ्च अवगमने प्रयोगे च सामर्थ्यं प्राप्नुयु:।
- संस्कृतशिक्षणस्य विधीनाम् उपागमानाञ्च अवगमने प्रयोगे च सामर्थ्यं प्राप्नुयु:।
- विविधपाठयोजनानाम् अवगमने निर्माणे च योग्या: स्यु:।
- संस्कृतशिक्षणकौशलानामभ्यासे समर्था: भवेयु:।
- विविधशिक्षणोपकरणानां निर्माणे प्रयोगे च प्रबुद्धा: भवेयु:।
- मूल्याङ्कनोपकरणानां निर्माणे प्रयोगे च दक्षा: भवेयु:।

**अन्विति:-1 संस्कृतस्य सम्प्रत्ययात्मकपृष्ठभूमि:**

1.1 संस्कृतस्य भाषावैज्ञानिकं स्वरूपम्, ऐतिहासिकं सांस्कृतिकं महत्त्वञ्च।

1.2 आधुनिकभारते संस्कृतशिक्षणस्य आवश्यकता उपहुति: (Challenge) च।

1.3 पाठ्यचर्यायां संस्कृतस्य स्थानं प्रभावश्च।

1.4 संस्कृतशिक्षक:- भारतीयवाङ्गमयसम्मते तस्य व्यक्तित्वम् उत्तरदायित्वञ्च।

**अन्विति:-2 संस्कृतशिक्षणस्य उद्देश्यानि**

2.1 पारम्परिकधारायां विविधस्तरेषु संस्कृतशिक्षणस्योद्देश्यानि।

2.2 आधुनिकधारायां विविधस्तरेषु संस्कृतशिक्षणस्योद्देश्यानि।

2.3 संस्कृतशिक्षणस्य गुणवत्तावर्धनम्- कक्षाया: पूर्वक्रिया:, कक्षान्त:क्रिया: कक्षोत्तरक्रिया: च।

अन्विति:-3 संस्कृतशिक्षणसिद्धान्ता: शिक्षणविधयश्च

3.1 शिक्षणसिद्धान्ता: - प्राकृतिकसिद्धान्त:, अभ्यासस्य सिद्धान्त:, रुचिसिद्धान्त:, मौखिकक्रियासिद्धान्त: समन्वयसिद्धान्त: च।

3.2 संस्कृतशिक्षणस्य उपागमाः, विधयः प्रविधयश्च। उपागमाः-संरचनोपागमः, सान्दर्भिकोपागमः, सम्प्रेषणोपागमः, मौखिकोपागमः च। विधय: - पारम्परिकविधि:, भण्डारकरविधिः, पाठ्यपुस्तकविधि:, प्रत्यक्षविधि: समाहारविधि: च। प्रविधयः- वस्तु/चित्रप्रदर्शनप्रविधिः, कोषप्रयोगप्रविधिः, स्पष्टीकरणप्रविधिः, व्युत्पत्तिबोधप्रविधिः, विश्लेषणप्रविधिः च।

3.3 शिक्षणसूत्राणि।

अन्विति:-4 पाठ्यपुस्तकानां परिचयः विविधा: पाठयोजनाश्च

4.1 पाठयोजना - अर्थ:, उद्देश्यानि, महत्त्वं स्वरूपम् च।

4.2 गद्यम्, पद्यम्, नाटकम्, कथा, रचना, व्याकरणम्, अनुवाद:- इत्येतेषां शिक्षणविधय: पाठयोजनाश्च।

4.3 संस्कृते मूल्याङ्कनविधय:, आदर्शप्रश्नपत्रनिर्माणञ्च।

4.4 संस्कृतशिक्षणे दृश्य-श्रव्योपकरणानां प्रयोग:।

सन्दर्भग्रन्था: (Reference Books)


1 मित्तल, सन्तोष; संस्कृतशिक्षणम्, नवचेतना पब्लिकेशन्स्, जयपुरम्

2 शर्मा, कुलदीपः,संस्कृतशिक्षणदीपिका,(प्रथमखण्डः)केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली 2022 ,

3 शर्मा, कुलदीपः, संस्कृतशिक्षणदीपिका ,(द्वितीयखण्डः) केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली , 2022

4 मिश्रः, लोकमान्य; साहित्यशिक्षणविधिः, मृगाक्षी प्रकाशनम्, गोमतीनगर, लखनऊ2013 ,

5 शर्मा, लक्ष्मीनारायण; सिंहः, फतह; संस्कृतशिक्षणं नवीनप्रविधयश्च, आदित्यप्रकाशन, जयपुरम्

6 लता, एन.; साहित्यशिक्षणम्, राष्ट्रियसंस्कृतसंस्थानम्, तिरुपतिः

7 शर्मा, कुलदीपः, प्रहेलिकाशतकम्, आइडियल पब्लिकेशन, जयपुरम् 2019 ,

8 मिश्र, आजाद; (प्रधानसम्पादक); संस्कृतभाषाशिक्षणम्, मध्यप्रदेशसंस्कृतबोर्ड, मध्यप्रदेशः

9 साम्बशिवमूर्ति, के.; संस्कृतशिक्षणम्, दीपशिखा प्रकाशनम्, जयपुरम्

10 झा, उदयशङ्कर; संस्कृतशिक्षणम् (शास्त्रशिक्षणसहितम्), चौखम्बा सुरभारती प्रकाशनम्, वाराणसी

11 चौधरी, प्रभादेवी, साहित्यशिक्षणम्, भोपालपरिसर, भोपाल

12 पाण्डेय, लक्ष्मीनिवास; संस्कृतकाव्यशिक्षणम्, श्रीलक्ष्मीसरस्वतीप्रकाशन, वाराणसी

13 शुक्लः, रजनीकान्तः; व्याकरणशिक्षणम्, राष्ट्रियसंस्कृतविद्यापीठ, तिरुपति।

14 डारामचन्द्रुल. बालाजी; बोधनपद्धतिः समीक्षा, मान्यता प्रकाशन, 2011

15 गायत्री, मुरलीकृष्णः; अध्यापनकौशलोद्दीपिका, जगदीश संस्कृत पुस्तकालय, जयपुरम्

16 विश्वासः, कौशलबोधिनी, संस्कृत-भारती, दिल्ली

17 तिवारी ;:नीलाभ ,संस्कृतप्रबोधिनी ,मध्यप्रदेशसंस्कृत बोर्ड, भोपालम्2007 ,

18 पतिः,डम्बरुधरः ; शैक्षिकचिन्तनम्, रचना प्रकाशन, जयपुर, राजस्थान, 2014

19 सफाया, रघुनाथ; संस्कृत शिक्षण, हरियाणा ग्रन्थ अकादमी, 1997

20 सिंह, कर्ण; संस्कृत शिक्षण विधि, एच्. पी. भार्गव बुक हाउस, आगरा

21 पाण्डेय, अरविन्द कुमार, संस्कृत शिक्षा का विकास, आदित्य बुक सेंटर दिल्ली

22 शर्मा, मुरलीधरः वि, संस्कृतशिक्षणसमस्याः, रा.सं.सं. विद्यापीठ, तिरुपतिः, 2003

# पञ्चमपत्रम् (वैकल्पिकम्)

## आधुनिकभाषाशिक्षणम्/ आधुनिकविषयशिक्षणम्

## 5.1 हिन्दी शिक्षण

श्रेयोऽङ्काः - 04

पूर्णाङ्काः- =100

**उद्देश्य-**

इस पाठ्यक्रम के अध्ययनोपरान्त छात्राध्यापक-

- मातृभाषा के रूप में हिन्दी भाषा की प्रगति से परिचित हो सकेंगे।
- भाषा कौशलों के प्रयोग में सक्षम हो सकेंगे।
- हिन्दी साहित्य की विभिन्न विधाओं के शिक्षण का ज्ञान प्राप्त करेंगे।
- हिन्दी भाषा की पाठ्यपुस्तकों की समीक्षा करने में समर्थ बनेंगे।
- दृश्यश्रव्य सामग्री के प्रयोग द्वारा हिन्दी शिक्षण को रुचिकर बना सकेंगे।
- भाषा के विभिन्न नवाचारों के आधार पर पाठयोजना बनाने में समर्थ होंगे।
- हिन्दी भाषा एवं साहित्य के प्रति जागरुक बनेंगे।
- आदर्श हिन्दी शिक्षक के रूप में दक्षता प्राप्त करेंगे।

**इकाई-1 हिन्दी भाषा**

1.1 हिन्दी भाषा, महत्त्व व विकास।

1.2 भाषा कौशलों का स्वरूप, महत्त्व, उद्देश्य तथा विधियाँ।

1.3 विविध स्तरों में हिन्दी शिक्षण के उद्देश्य।

**इकाई-2 हिन्दी विधा शिक्षण**

2.1 गद्य, पद्य व्याकरण एवं नाटक का अर्थ, उद्देश्य, महत्त्वशिक्षण , विधियाँ एवं पाठयोजनाएँ ।

**इकाई-3 हिन्दी पाठ्यपुस्तक एवं हिन्दी शिक्षक**

3.1 पाठ्यपुस्तक की ऐतिहासिक पृष्ठभूमि, पाठ्यपुस्तक का महत्त्व।

3.2 हिन्दी के पाठ्य पुस्तकों के बाह्य एवं आन्तरिक गुण।

3.3 पाठ्यपुस्तक निर्माण के सिद्धान्त। हिन्दी की पाठ्यपुस्तकों का आलोचनात्मक अध्ययन, हिन्दी की पाठ्यपुस्तक का मूल्याङ्कन।

3.4 हिन्दी शिक्षक-विशेषताएँ एवं उसके विशेष दायित्व।

**इकाई-4 दृश्य-श्रव्य सामग्री**

4.1 दृश्य-श्रव्य सामग्री  सामग्री का अर्थ, परिभाषा एवं प्रकार । श्रव्य सामग्री, दृश्य सामग्री एवं दृश्य- श्रव्य सामग्री ।

4.2 दृश्य-श्रव्य  साधनों के उद्देश्य एवं उनका महत्त्व। हिन्दी शिक्षण में दृश्य-श्रव्य सामग्री की उपादेयता। दृश्य-श्रव्यसामग्री के प्रयोग करते समय सावधानियाँ।

**सन्दर्भग्रन्था: (Reference Book)**


1. द्विवेदी लखनऊ ,गोमती नगर ,हिन्दी शिक्षण ;देवीप्रसाद ,
2. डॉ दाताराम पाठक ;हिन्दी शिक्षण ,तेजस्विनी प्रकाशन ,भोपाल2015 ,
3. क्षत्रिय के.; मातृभाषा शिक्षण, विनोद पुस्तक मन्दिर, आगरा
4. बघेला, हेतसिंह; हिन्दी शिक्षण, यूनिवर्सिटी पब्लिकेशन्स, जयपुर
5. पाण्डेय, रामशकल; हिन्दी शिक्षण, विनोद पुस्तक मन्दिर, आगरा
6. सिंह सावित्री; हिन्दी शिक्षण, विनोद पुस्तक मन्दिर, आगरा
7. सिंह निरंजन कुमार; माध्यमिक विद्यालयों में हिन्दी शिक्षण, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर
8. भाई योगेन्द्रजीत; हिन्दी भाषा शिक्षण, विनोद पुस्तक मन्दिर, आगरा
9. श्रीवास्तव आर.पी.; हिन्दी शिक्षण, नमन प्रकाशन, नई दिल्ली
10. सफाया रघुनाथ; हिन्दी शिक्षण विधि, हरियाणा हिन्दी ग्रन्थ अकादमी, चण्डीगढ़

## पञ्चमपत्रम् (वैकल्पिकम्)

## 5.2 Teaching of English

## (Modern Language Teaching)

## (Optional)

श्रेयोऽङ्काः - 04

पूर्णाङ्का:- =100

Objectives-

On Completion of this Course the Pupil Teacher will be able to:

- Understand the importance of English language.
- Understand the features of language learning.
- Acquire and apply the language teaching skills.
- Teach Grammar & Vocabulary acquisition efficiently.
- Acquaint with the evaluation methods of English language teaching.

Unit-1. Objectives of Teaching English at Secondary level

1.1 English in Indian Education system.

1.2 English as a Second Language and as a foreign language.

1.3 Objectives of Teaching English at Secondary Level.

Unit-2. Teaching Language Skills, Methods and Text books

1.1 Development of four basic skills- Listening, Speaking, Reading and Writing.

1.2 Teaching reference skills (Dictionaries, Thesaurus and Encyclopedias)

1.3 Text book method, Grammar Translation method and Direct Method etc.

Unit-3. Planning English Language Teaching

3.1 Objectives of Teaching Prose, Poetry, Supplementary Reader, Grammar and Composition to secondary school students.

3.2 Lesson plans to teach Prose, Poetry, Grammar & Composition to Secondary School Students.

Unit-4. Evaluation

4.1 Concept and process of evaluation and bloom's taxonomy.

4.2 Tools of evaluation, preparing test items, and blue print. Analysis and interpretation of scores.

सन्दर्भग्रन्था: (Reference Books)

1. Pramila Dubey, Teaching of English Shiksha Prakshan, Jaipur.
2. Manju Mishra, English Teaching- Seema Publication Jaipur.
3. Abha Rani Bisht, Teaching English in India- Vinod Pustak Mandir Agra.
4. Subha Vyas, Aspects of English Teaching Shiksha Prakshan Jaipur.
5. Annie, Vijay Kumari, Ch. Methods of Teaching English, New Era Publication, Guntur.
6. Jain, R. K., Sharma, C. K., Essentials of English Teaching, Vinod Pustak Mandir, Agra.

# पञ्चमपत्रम्

## 5.3 क्षेत्रीयभाषा (मलयालम्/कन्नड/ओडिया/बाङ्ग्ला/डोगरी/मराठी)

## (एतासु अन्यतमा भाषा)

श्रेयोऽङ्काः - 04

पूर्णाङ्का:- =100

उद्देश्यानि-

**अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-**

- मातृभाषाया: प्रकृते:, महत्त्वस्य च विषये अवगता: भवेयु:।
- भाषाविकासस्य विविधसिद्धान्तानामवबोधं, मातृभाषया सह तत्तुलनाञ्च कर्तुं समर्था: भवेयु:।
- मातृभाषाशिक्षणस्य प्रयोगज्ञानं प्राप्नुयु:।
- उत्तमभाषाशिक्षणकौशलप्राप्तये समर्था: स्यु:।
- नानाप्रकारकपाठयोजनानां प्राप्तये मातृभाषाशिक्षणसन्दर्भे तेषां प्रयोगाय च योग्या: भवेयु:।
- पाठ्यपुस्तकनिर्माणसिद्धान्तानामवगमने योग्यमातृभाषापाठ्यपुस्तकनिर्माणे च सफला: जायेरन्।
- मातृभाषाया: रसानुभूतिविषये बद्धादरा: भवेयु:।

**अन्विति:- 1 शिक्षाया: त्रिभाषासूत्रे मातृभाषाया: प्रामुख्यम्**

1.1 निर्दिष्टक्षेत्रीयभाषाया: सन्दर्भे शासकीयानि प्रमुखप्रतिवेदनानि।

1.2 मातृभाषाया: माध्यमविषये महात्मगान्धी-गुरुदेवरवीन्द्रनाथठाकुरप्रभृतीनां विदुषामभिप्राय:।

1.3 मलयालम/कन्नड/ओडिया/बाङ्ग्ला/डोगरी-मराठी-भाषाया: साहित्यसंस्कृत्यो: विकासे विविधसंस्थानां योगदानम्।

**अन्विति:-2 मातृभाषाशिक्षणम्**

2.1 अभिव्यक्ते:, रसानुभूते:, संस्कृते: विकासस्य कलात्मकस्य च उद्देश्यानि।

2.2 क्षेत्रीयशिक्षाव्यवस्थायां माध्यमिकशिक्षास्तरे मातृभाषाया: स्थानम्।
माध्यमिकविद्यालये पाठ्यक्रमे क्षेत्रीयभाषात्वेन मलयालम्/कन्नड/ ओडिआ/ बाङ्ग्ला/डोगरी/ मराठी-भाषाया: स्थानम्।

2.3 मातृभाषाशिक्षकस्य भूमिका गुणाश्च।

2.4 मातृभाषाशिक्षणे मूल्याङ्कनप्रविधि:, प्रकारा उपलब्धिपरीक्षणानि च।

**अन्विति:-3 भाषाया: अभिवृद्धि:**

3.1 मलयालम्/कन्नड/ओडिया/बाङ्ग्ला/डोगरी/मराठी-भाषाया: विविधकालिकविकास:।

3.2 मलयालम/कन्नड/ओडिया/ बाङ्ग्ला/डोगरी/मराठी-साहित्यस्य प्रकारा:- कथा:, नाटकानि, पद्यानि, लघुकथा: आत्मवृत्तानि च।

**अन्विति:-4 पाठानां प्रकारा: पाठयोजना: च**

4.1 गद्यशिक्षणस्य पद्यशिक्षणस्य नाटकशिक्षणस्य च प्रकृति:, उद्देश्यानि पाठयोजना चेति।

4.2 मातृभाषाशिक्षणविधय:-प्रत्यक्षविधि: अनुवादविधिश्चेति।

4.3 मातृभाषाशिक्षणे शिक्षणोपकरणानि भाषाप्रयोगशालाया: लाभाश्च।

4.4 पाठ्यपुस्तकस्य प्रकृति: उद्देश्यानि च। पाठ्यपुस्तकनिर्माणसिद्धान्ता:।

**सन्दर्भग्रन्था: -**

**कन्नडशिक्षण**

(1) डा अनसूया,वि,परगि; मातृभाषे कन्नड तत्व मत्तु बोधना मार्ग, विवेक प्रकाशन, चिक्कबल्लापुर,मुन्सिपल् कालेज ओफ एज्युकेशन् ,चित्रावती मञ्चनबाले पोस्ट,चिक्कबल्लापुर

(2) डा बी, डी, करजगि & डा,रामचन्द्र, त, जन्तली; सुबोध कन्नड भाषा बोधने , भारतबुक् डिपो शंकर - फ्लाजा, पि,बी,रोड, धारवाड

(3) डा,आर्,ओबलेशघट्टी; भाषे मत्तु कन्नडभाषा बोधने, विद्यानिधि प्रकाशन, गदग

(4) डा,एन्,बी,कोङ्गवाड; भाषे मत्तु कन्नडबोधने, विद्यानिधिप्रकाशन, गदग

(5) डा,बि,बि,होलगुन्दी; कन्नडबोधनायोजनेगलु, विद्यानिधिप्रकाशन, गदग

(6) प्रो,एम्,एन्,हेगडे ; कन्नडभाषेबोधने , प्रदीपप्रकाशन, गदग

(7) प्रो,एम्,एन्,हेगडे; कन्नडबोधनापद्धति

(8) डा,एम्,चिदानन्दमूर्ति,डी,वि,के; भाषाविज्ञानदमूलतत्त्वगलु; मूर्तिप्रकाशन, मैसूरु

(9) डा,जी,एन्,हिरेमठ &डा,श्रीमती,एम्,बी,कलमडी; क्रमानुगतबोधने (ओंदु बोधनातन्त्रज्ञान),

I. विद्यानिधि प्रकाशन, गदग

## मलयालमशिक्षण

1. टीचिंग आफ मदरटंग, एस.के. कोच्चर:, स्टेर्लिंग, नई दिल्ली।
2. मलयालेबोधनम्, सि.के. चन्द्रशेखरननायर, केरलभाषाइन्स्टिट्यूट।
3. मलयालभाषे अध्यापनम्, के. शिवरामन पि, रमनउन्नि, कालिकट विश्वविद्यालय:, कालिकट, केरल।
4. मातृभाषा बोधनम्, सि.एम. बिन्दु, स्कार्पियो पब्लिशर्स एवम् डिस्ट्रिब्यूटर्स, कालिकट, केरल।

## ओडिया शिक्षण

1 पाणीग्राही ;निर्मला ,ओडिया मातृभाषा शिक्षण प्रवृत्ति 2011 ,भुवनेश्वर ,दिव्य प्रकाशन ,

2 नायक बि., मोहन्ति जे ;ओडिया भाषा ओ साहित्य भित्ति भूमि ओ शिक्षादाने पद्धति, ।

2. पट्टनायक, डि.पि. ;मदरटंग अन्डर डेस्टिनि ।

3. प्रो.पण्डा ;गंगाधर ,मातृभाषाशिक्षण ।

4. मातृभाषा ओडया, महापात्र, बि.पि.।

## डोगरी/बाङ्ग्ला/मराठीशिक्षणम्

1. मातृभाषा शिक्षण, विनोद पुस्तक मन्दिरम्, आगरा।
2. मातृभाषा शिक्षण, बघेला, हेतसिंह, राजस्थान प्रकाशन, त्रिपोलिया बाजार, जयपुर।
3. टीचिंग आफ मदरटंग, कोच्चर, स्टेर्लिंग, नई दिल्ली।

## पञ्चमपत्रम् (वैकल्पिकम्)आधुनिकविषयशिक्षणम्-)

## 5.4 सामाजिकविज्ञानशिक्षणम्

श्रेयोऽङ्काः - 04

पूर्णाङ्काः- =100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापकाः-

- पृथग्विषयरूपेण समवेतविषयरूपेण वा सामाजिकविज्ञानस्य अधिगममहत्त्वम् अवगच्छेयु:।
- सामाजिकविज्ञानविषयस्य अवदानस्य सामान्यसिद्धान्तानां विकासं जानीयु:।
- कक्षाशिक्षणस्य कृते आवश्यककौशलानि अवाप्नुयु:।
- सामाजिकविज्ञानस्य आधुनिकशिक्षणपद्धतीनां प्रयोगान् अभिजानीयु:।
- अनुदेशनस्य कृते पूर्णयोजनाया: विकासने समर्था: भवेयु:।
- पाठ्यक्रमसहकारकक्रियाणामायोजनस्य सामाजिकस्रोतांसि परिचिनुयु:।

**अन्विति:-1 सामाजिकविज्ञानस्य सम्प्रत्यय:**

1.1 सामाजिकविज्ञानस्य सम्प्रत्यय:, आवश्यकता उद्देश्यानि च।

1.2 सामाजिकविज्ञानस्य ऐतिहासिकपृष्ठभूमि:।

1.3 सामाजिकविज्ञानशिक्षणस्य समवेतविषयरूपेण विशेषप्रयासानां निर्धारणम्।

**अन्विति:-2 सामाजिकविज्ञानस्य अनुदेशनपद्धतय:**

2.1 अनुदेशनव्यूहस्यावश्यकता।

2.2 सामाजिकविज्ञानस्य शिक्षणविधय:- व्याख्यानोपेतवादविवाद-विधि:, योजनास्रोतोविधि:, समस्यासमाधानविधि:, एककविधि:, सर्वेक्षणविधि:, समाजीकृताभिव्यक्तिविधि: निरीक्षिताध्ययनविधि: च।

2.3 सामाजिकविज्ञानस्य शिक्षणाव्यूहनिर्माणम् - उपर्युक्तविधीनां सन्दर्भे।

**अन्विति:-3 सामाजिकविज्ञानं शिक्षणपद्धतयजनापाठयो : च**

3.1 क्षेत्राटनम्, दलशिक्षणम्, सामाजिकविज्ञानसङ्घस्य (Social Studies club) आयोजनम् सामाजिकविज्ञानप्रयोगशाला च।

3.2 पाठयोजना, एककयोजना, वार्षिकयोजनानां संरचनायां च अवधेयांशा:।

3.3 अनुदेशनकौशलानां विकास:, यथा - स्पष्टीकरणम्, प्रश्नोत्तरकौशलम्, उद्दीपनपरिवर्तनम्, सम्बद्धोदाहरणै: व्याख्यानम् च।

**अन्विति:- 4 सामाजिकविज्ञाने मूल्याङ्कनम्**

4.1 मूल्याङ्कनस्योद्देश्यानि परम्परागतपरिवर्तनानि च।

4.2 मूल्याङ्कनस्य साधनानि उपादेयता च।

4.3 उपचारात्मकशिक्षणस्य स्वरूपम्, महत्त्वं प्रयोगश्च।

4.4 निबन्धात्मकप्रश्नेषु प्रश्नानाम् अनुपात: वस्तुनिष्ठता च।

**सन्दर्भग्रन्था: (Reference Books)**


1. पाण्डेय:, सोहनलाल:, सामाजिकविज्ञानशिक्षणम्, अक्षरप्रकाशनम्, जयपुरम्, 2004
2. डॉ दातारामपाठकः; सामाजिक-अध्ययन-शिक्षणम्, तेजस्विनी-प्रकाशनम् भोपालम्, 2015
3. पाण्डेय, सोहनलाल, इतिहास शिक्षण, श्याम प्रकाशन, जयपुर, 2007
4. त्यागी गुरुशरणदास, सामाजिक अध्ययन का शिक्षण, विनोद पुस्तक मन्दिर, आगरा, 1990
5. Kochar S.K., Teaching of Social Studies, Sterling Publication, New Delhi, 1996.

# द्वितीयसत्रार्द्धम्

## व्यावसायिकक्षमतानाम् उन्नयनम् (EPC-2)
## शिक्षाभाषाकार्याणि च
## (Language and Activities in Education)

श्रेयोऽङ्काः = 04

पूर्णाङ्का: = 100

1. **सामाजिकचेतनाशोभायात्रा-** 10 अङ्का:
   जनजागरणाय वर्षे एकवारं सवैभवं कमपि सामाजिकविषयमादाय संस्कृतवचसां सघोषम् आचरणं कारणीयम्।
2. **वीथीनाटकम्-** 10 अङ्का:
   नागरिकाणां मध्ये प्रासङ्गिकं कमपि विषयमादाय संस्कृते वीथीनाटकं सामूहिकरूपेण करणीयम्।
3. **सांस्कृतिकगतिविधय:-** 10 अङ्का:
   भारते प्रचलितानां लोककलानां परिचयपूर्वकं कस्यचिदेकस्य गतिविधे: अभिव्यक्तीकरणम्।
4. **क्रीडा: -** 10 अङ्का:
   प्राचीनभारतीयप्रचलितक्रीडानां परिशीलनं विधाय कस्याश्चित् एकस्या: क्रीडाया:
   इतिहासं, क्रीडापद्धतिं क्रीडानियमान् च प्रदर्श्य प्रतिवेदनसमर्पणम्।
   गतिविधि: एकत: चत्वारि पर्यन्तं (1 -4 ) सत्रार्द्धस्य प्रथममासे समायोज्य मूल्याङ्कनं च विधाय सम्बद्धप्राध्यापका: विद्याशाखाया: अध्यक्षाय परिणामान् समर्पयिष्यन्ति ।

5. **विशिष्टशिक्षणसंस्था/गुरुकुलसन्दर्शनम्-** **20 अङ्का:**
   परिसरे समीपवर्तिनां (अधिकतमं पञ्चशतकिलोमीटरपरिमितानां) संस्कृतस्य विशिष्टशिक्षणसंस्थानां निरीक्षणं पर्यवेक्षणं च विधाय दशपृष्ठात्मकं प्रतिवेदनं सत्रार्द्धस्य द्वितीयमासे सम्बद्धप्राध्यापकेभ्यः समर्पणीयम्।
6. **विद्यालयाभिलेखानां सन्नाहः -** 20 अङ्का:

छात्राणां संचयीयाभिलेखस्य (Cumulative Records) प्रारूपनिर्मितिः, छात्रोपस्थितिपंजिकायाः स्वरूपनिर्मितिः, अध्यापकोपस्थितिपंजिकायाः प्रारूपनिर्मितिः, छात्रकोषशुल्कादिसम्बद्धानाम् अभिलेखानां प्रारूपनिर्मितिश्चेति। एतत् सम्बद्धं दशपृष्ठात्मकं प्रतिवेदनं सत्रार्द्धस्य तृतीयमासे सम्बद्धप्राध्यपकेभ्यः समर्पणीयम्।

7. **वाग्वर्धिनीपरिषद्-** 10 अङ्काः

प्रतिसप्ताहं कमप्येकं शास्त्रीयविषयं स्वीकृत्य समेषां भागग्रहणम्परीक्षणीयम् ।

8. **संगोष्ठी** 10 अङ्काः

शिक्षासमस्या: आदाय आसत्रं त्रिवारं विभागीयस्तरे सङ्गोष्ठी प्रशिक्षणार्थिभि: समायोजनीया ।

गतिविधि: सप्तत: अष्टपर्यन्तं (7-8) सत्रार्द्धस्य चतुर्थे मासे समायोज्य मूल्याङ्कनं च विधाय सम्बद्धप्राध्यापका: विद्याशाखाया: अध्यक्षाय परिणामान् समर्पयिष्यन्ति ।

# शैक्षणिकगतिविधयः

श्रेयोऽङ्काः-  02

पूर्णाङ्का: - 50

1. **विविधशारीरिक-बौद्धिकक्रीडानाम् आयोजनम् ।**

   परिसरे सत्रार्द्धकाले विविधानां क्रीडास्पर्धानां/सांस्कृतिकस्पर्धानां/साहित्यिकस्पर्धानाम् आयोजनं तेषु प्रतिभागिरूपेण आयोजकरूपेण च भागग्रहणं विधाय सम्बद्धप्राध्यापक: तेषां मूल्याङ्कनं फलाङ्कनं च सत्रार्द्धस्य तृतीयसप्ताहे शिक्षाशास्त्रविद्याशाखाध्यक्षाय समर्पयिष्यति|

2. **NSS/ स्काउटिंग-गाइडिंग  - प्रभृतिविविधगतिविधीनाम् आयोजनम्।**

   परिसरे राष्ट्रियसेवायोजनाया: 'स्काउटगाइड' इत्येतस्य 'मास्टर्स' 'गाइड्स केप्टेन'  इति दशदिवसीयप्रशिक्षणशिविरस्य च  आयोजनं विधाय सञ्चालनानन्तरं  सम्बद्धप्राध्यापका: गतिविधीनां मूल्याङ्कनपुरस्सरं फलाङ्कनं विद्याशाखाध्यक्षाय सत्रार्धस्य चतुर्थे मासे समर्पयिष्यति।

# शिक्षाशास्त्री
## तृतीयं सत्रार्द्धम्
## पाठ्यक्रमस्य विवरणम्

श्रेयोऽङ्काः (Credits) = 24+2=26

**<u>शिक्षणप्रशिक्षुताकार्यक्रमः</u>**

**तृतीयसत्रार्द्धपाठ्यक्रमस्य प्रारूपम्**

| पाठ्यक्रमस्य नाम | पूर्णांकाः 500 | श्रेयोऽ ङ्काः 26 | समयावधिः 22 |
|---|---|---|---|
| ➢ अन्तर्वृत्त्याभ्यासः (विद्यालयसम्बद्धता) प्रशिक्षुता/<br>• बाह्यपरीक्षकेण सह मूल्याङ्कनम् -<br>• आन्तरिकमूल्याङ्कनम्) -समीक्षापाठयोजना निर्माणाय(<br>➢ शिक्षणाभ्यासः कालस्य कृते<br>➢ सूक्ष्मशिक्षणम्<br>➢ प्रायोगिकमनोविज्ञानम् | 350<br>300( अङ्काः)<br>50( अङ्काः)<br>50 अङ्काः<br>50 अङ्काः<br>50 अङ्काः | 20 | सप्ताहाः 16 |
| ➢ प्रायोगिकम् .(EPC-3) | 100 | 4 | 4 सप्ताहाः |
| ➢ शैक्षिकगतिविधयः | 50 | 2 | 2 सप्ताहाः |
| | 650 | 26 | 22 |

**प्रशिक्षुतामूल्यांकनप्रक्रियायाः स्वरूपम्**

| | |
|---|---|
| बाह्यपरीक्षणम् 300 अङ्काः<br>आन्तरिकपरीक्षणम् 50 अङ्काः | 20 श्रेयोऽ ङ्काः |
| बाह्यपरीक्षणम् – 300 अङ्काः | एक आन्तरिकः एकः बाह्यश्च - 2 परीक्षकौ<br>संस्कृतविषयः - 150अङ्काः<br>आधुनिकविषयः – 150अङ्काः |
| आन्तरिकपरीक्षणम् 50 अङ्काः | समीक्षापाठयोजना निर्माणाय – 50<br>• संस्कृतपाठस्य समीक्षा - 25 अङ्काः<br>• आधुनिकविषयस्य समीक्षा - 25 अङ्काः |
| प्रायोगिकमनोविज्ञानम् 50अङ्काः | मनोविज्ञानस्य परीक्षणानि<br>लिखिताभिलेखानाम् - 30अङ्काः<br>मौखिकपरीक्षा – 20अङ्काः |
| शिक्षणाभ्यासः कालस्य कृते 50 अङ्काः | यस्मिन् विद्यालये अन्तर्वृत्त्यभ्यास/प्रशिक्षुता भविष्यति तस्य विद्यालयस्य प्रमुखः/मुख्याध्यापकः/प्राचार्यः अधोलिखितरूपेण पंचाशतः अङ्कानाम् अङ्कपत्रं प्रदद्यात्।<br>• पाठयोजनानिर्माणम् - 10अङ्काः |

| | |
|---|---|
| | • उपस्थितिः (नियमितता) - 10अङ्काः<br>• अनुशासनम् - 10अङ्काः<br>• दैनन्दिनी लेखा – 10अङ्काः<br>• विद्यालये अन्यासु क्रियासु योगदानम् – 10अङ्काः |

## ❖ विद्यालयान्तर्वृत्त्याभ्यासः/प्रशिक्षुता (School Internship)

**श्रेयोऽङ्काः** (Credits)-20

**उद्देश्यानि -**

**प्रशिक्षुताकार्यक्रमस्य मुख्योद्देश्यं व्यावसायिकदक्षतायाः विकासनं वर्तते । येन निम्नलिखितानि उद्देश्यानि प्राप्तुं प्रयासः भविष्यति--**

- वास्तविकविद्यालयपरिवेशस्य अनुभवः।
- विद्यालयीयगतिविधिभिः परिचयः।
- पाठयोजनानुसारं शिक्षणस्य अभ्यासः।
- वास्तविकपरिस्थितिषु शिक्षणकार्यस्य अभ्यासः।
- पाठ्यक्रमे निर्धारितशिक्षणविषयाणां शिक्षणे कौशलसंवर्धनम्।

**विद्यालयप्रशिक्षुताकार्यक्रमस्य मूल्यांकनप्रक्रियायाः स्वरूपम् (16 सप्ताहान् यावत् कार्यक्रमः)**

- **विद्यालयपरिवेशस्य ज्ञानम् अभिलेखज्ञानं च** (One Week Programme)
  - प्रथमसप्ताहे सम्बद्धविद्यालयस्य नियमिताध्यापकानाम् अध्यापनकार्यस्य अवलोकनम्।
  - सम्बद्धविद्यालयस्य सामुदायिकपरिवेशस्य प्रेक्षणं प्रतिवेदनं च।
  - सम्बद्धविद्यालयस्य गतिविधीनाम् अभिलेखानां च निरीक्षणं प्रतिवेदनं निर्माणं च।
- **कक्षाशिक्षणाभिमुखीकरणम्** (One Week Programme)
  - द्वितीयसप्ताहे कक्षाशिक्षणाभिमुखीकरणम् (सम्बद्धविद्यालयस्य शिक्षकाणां निर्देशने)
  - शिक्षणाभ्यासकाले आगतानां संस्कृतपारिभाषिकशब्दानां कक्षायां प्रयोगाभ्यासः (पाठयोजनायाः सोपानानुसारं छात्राध्यापकक्रियासु व्यवह्रीयमाणांनां पदानां प्रयोगाभ्यासः)
- **शिक्षणाभ्यासः** (14 Week Programme)
  - पाठयोजना-आधारित शिक्षणाभ्यासः।
  - संस्कृतविषयम् आधुनिकविषयं चावलम्ब्य शिक्षणाभ्यासः। विद्यालयेषु संस्कृतस्य विंशतिः पाठाः आधुनिकविषयस्य विंशतिः पाठाश्चेति ।
  - समीक्षापाठानां सन्नद्धता, प्रतिविषयं पाठद्वयस्य समीक्षणम्।

  (प्रत्येकं विषयस्य पंचदशपाठानां शिक्षणानन्तरम् एकम् अपठितं पाठ्यांशं चित्वा परिसरीयप्राध्यापकस्य समग्रनिर्देशने समीक्षापाठं विरच्य पाठयेयुः।
  - स्वकीयशिक्षणविषये सहपाठिछात्राध्यापकानां शिक्षणप्रक्रियायाः अवलोकनम्, अवलोकनप्रपत्राणां पूरणं च।
  - विद्यालयगतिविधिषु भागग्रहणं विवरणलेखनं च।
  - विद्यालयगतिविधीनां सूक्ष्मैक्षिकया निरीक्षणं विधाय प्रतिवेदनं मासान्ते सम्बद्धप्राध्यापकाय प्रत्येकं प्रशिक्षणार्थी समर्पयिष्यति।
  - बाह्यपरीक्षकः आन्तरिकपरीक्षकश्च विषयद्वयस्य मूल्याङ्कनं विधास्यतः।

## ❖ प्रायोगिकमनोविज्ञानम् (Psychology Practical)

1. अधिगमः - दर्पणरेखाङ्कनपरीक्षणम् अभिलेखः
2. प्रबोधः अवधानञ्च - अवधानस्य विस्तारः
3. स्वतन्त्रसाहचर्यम् - शब्दतालिकाविधिः बद्धसाहचर्यम्
4. बुद्धिपरीक्षणम्- वैयक्तिकं सामूहिकञ्च।
5. व्यक्तित्वपरीक्षणम्।
6. स्मृतिः - तात्कालिकी दीर्घकालिकी च।

## ❖ परिसरे सूक्ष्मशिक्षणाभ्यासः

छात्राध्यापकाः परस्परं प्रस्तावनाकौशलम्, श्यामपट्टकौशलम्, व्याख्याकौशलम्, प्रश्नकौशलम् मूल्यांकनकौशलम् चेत्येतेषां सूक्ष्मपाठानां शिक्षणाभ्यासं करिष्यन्ति। संस्कृतम् (Sanskrit) - 5 पाठाः आधुनिकविषयाः भाषावेति (Modern Subject and Languages) 5 पाठाश्च भविष्यन्ति। सत्रार्द्धेऽस्मिन् प्रथममासे सूक्ष्मशिक्षणस्य प्रायोगिकमनोविज्ञानस्य च अभ्यासः भवेत्। निर्धारितानां कौशलानां विकासाय सूक्ष्मशिक्षणदृष्ट्या सूक्ष्मपाठयोजनानिर्माणं, निर्मितपाठयोजनायाः प्रयोगः परिसरे शिक्षाशास्त्रविद्याशाखायाः छात्राध्यापकाणां परस्परं भवितुमर्हति अथवा प्राक्शास्त्रिछात्रानुद्दिश्य भवितुमर्हति।

पूर्वाह्णे सूक्ष्मशिक्षणाभ्यासश्चेत् अपराह्णे प्रोयोगिकमनोविज्ञानस्य प्रशिक्षणाभ्यासौ स्याताम्। एतद् गतिविधिद्वयं सुचारुसम्पाद्य सम्बद्धप्राध्यापकः मूल्यांकनं विधाय शिक्षाशास्त्रविद्याशाखायाः अध्यक्षाय समर्पयिष्यति।

व्या.क्ष.उ.-3 शिक्षणं सूचनासम्प्रेषणप्रविधिश्च श्रेयोऽङ्काः (Credits) 04 100 अङ्का:
(EPC-3) (Teaching and ICT)

1. प्राविधिकशिक्षणोपकरणनिर्माणम् (10+10=20)

   Making of Teaching aid based on Technology

   1.1 संस्कृतम् (Sanskrit) -1 10 अङ्का:

   1.2 आधुनिकविषया: (Modern Subject) -1 10 अङ्का:

2. M.S. Word, P.P.T, PDF & Picture Formats (20)

   2.1 इत्येतेषां व्यावहारिकोपयोगसम्पादनेन सह कस्यचिदेकस्य विषयस्य न्यूनातिन्यूनं 10 slides PPT रूपेण विनिर्मेयम्।

3. संस्कृतम्-आधुनिकविषययोः एकैकः पाठः PPT रूपेण प्रस्तोतव्यः (5+5 =10)

4. प्रायोगिकरूपेण एकस्य संस्कृतविषयस्य विकिपीडिया मध्ये आरोपणम् 10 अङ्का:
   (Upload a Sanskrit content on Wikipedia practically)

5. विद्यालयगतिविधिप्रतिवेदनम् (10×04=40)

   5.1 विद्यालये समायोजितस्य एकस्य शैक्षणिकगतिविधेः पंचपृष्ठात्मकं विवरणं विलिख्य सम्बद्धप्राध्यापकाय प्रतिवेदनं समर्पणीयम्। 10 अङ्का:

   5.2 विद्यालये समायोजितस्य एकस्य सांस्कृतिकगतिविधेः पंचपृष्ठात्मकं विवरणं विलिख्य सम्बद्धप्राध्यापकाय प्रतिवेदनं समर्पणीयम्। 10 अङ्का:

   5.3 विद्यालये समायोजितस्य एकस्य अन्तःक्रीडागतिविधेः (Indore game Activity) पंचपृष्ठात्मकं विवरणं विलिख्य सम्बद्धप्राध्यापकाय प्रतिवेदनं समर्पणीयम्। 10 अङ्का:

   5.4 विद्यालये समायोजितस्य एकस्य बाह्यक्रीडागतिविधेः(Out-dore game Activity) पंचपृष्ठात्मकं विवरणं विलिख्य सम्बद्धप्राध्यापकाय प्रतिवेदनं समर्पणीयम्। 10 अङ्का:

❖ **शैक्षणिकगतिविधयः** श्रेयोऽङ्काः (Credits)-02

- दृश्य-श्रव्य-उपकरणानां प्रदर्शिनी – 10 अङ्का:
- **संस्कृतसप्ताहः**:- छात्राणां प्रतियोगितासु भागग्रहणम्, कार्यक्रमसंचालने दायित्वस्वीकरणम्, प्रतिवेदनलेखनं च । 10 अङ्का:
- **हिन्दीपक्षः**:-छात्राणां प्रतियोगितासु भागग्रहणम्, कार्यक्रमसंचालने दायित्वस्वीकरणम्, प्रतिवेदनलेखनं च। 10 अङ्का:
- **सामूहिकरचनात्मककार्यम्**-छात्रान् गणशः विभज्य प्रत्येकं गणेन रचनात्मककार्यं सम्पादनीयम् ।
  10 अङ्का:
- **कला शिल्पं च** 10 अङ्का:

  पुरातनीनां चतुष्षष्टिकलानां परिचयपुरस्सरं दिनत्रयात्मिका शिक्षणोपकरणनिर्माणविषयिणी कार्यशाला आयोजनीया।

# शिक्षाशास्त्री

## चतुर्थसत्रार्द्धम्

### पाठ्यक्रमस्य विवरणम्

| क्र.सं Sr.No. | पाठ्यक्रमप्रकाराः Types of Course | सैद्धान्तिकपत्राणि Theory Papers | सैद्धान्तिकाङ्काः Theoretical Marks | समग्रसततमूल्याङ्कनाङ्काः Comprehensive Continuous Evaluation (CCE) Marks | पूर्णाङ्काः Total Marks | श्रेयोऽङ्काः Credits | घण्टाः Hours |
|---|---|---|---|---|---|---|---|
| **अनिवार्यपत्राणि** (Compulsory Papers) | | | | | | | |
| 1 | Foundation | पाठ्यचर्या विद्यालयश्च | 60 | 40 | 100 | 04 | 64 |
| 2 | Skill | पर्यावरणशिक्षा | 60 | 40 | 100 | 04 | 64 |
| 3 | Foundation | समावेशात्मिका शिक्षा | 60 | 40 | 100 | 04 | 64 |
| 4 | Foundation | मूल्यशिक्षा मानवाधिकारशिक्षा च | 60 | 40 | 100 | 04 | 64 |
| 5 | Elective/ Optional | "अ" योग: शारीरिकशिक्षा च अथवा प्रौढशिक्षा | 30 | 20 | 100 | 04 | 64 |
| | | "ब" निर्देशनं परामर्शश्च अथवा जनसंख्याशिक्षा | 30 | 20 | | | |
| प्रायोगिकम् (Practical's) | | | | | | | |
| 1 | Skill | व्यावसायिकक्षमतोन्नयनम् (EPC-04) (क्षेत्रनिष्ठकार्याणि) | - | 100 | 100 | 04 | 64 |
| 2 | Skill | शैक्षणिकगतिविधय: | - | 50 | 50 | 02 | 32 |
| **योग:** | | | 300 | 350 | 650 | 26 | 416 |

# शिक्षाशास्त्री सत्रार्द्धपाठ्यक्रम:

## चतुर्थ सत्रार्द्धम्

श्रेयोऽङ्काः (क्रेडिट्स) = 24+2=26

पूर्णाङ्का: = 500+100+50 =650

| | पूर्णाङ्का: | श्रेयोऽङ्काः |
|---|---|---|
| प्रथमं पत्रम् - पाठ्यचर्या विद्यालयश्च | 100 | 04 |
| द्वितीयं पत्रम् – पर्यावरणशिक्षा | 100 | 04 |
| तृतीयं पत्रम् – समावेशात्मिका शिक्षा | 100 | 04 |
| चतुर्थं पत्रम् – मूल्यशिक्षा मानवाधिकारशिक्षा च | 100 | 04 |

**पञ्चमं पत्रम्-** चतुर्थसत्रार्द्धे पञ्चमं पत्रं द्वयो: खण्डयो: विभज्यते। प्रतिखण्डं च द्वौ पाठ्यक्रमौ भवत: । तयो: द्वयो: खण्डयो: एकैक: पाठ्यक्रम: चेय:।

द्वौ श्रेयोऽङ्कौ यथा – "अ" खण्डात् – एकः 50 अङ्का:

द्वौ श्रेयोऽङ्कौ यथा – "ब" खण्डात् – एकः 50 अङ्का:

तदा एव 100 अङ्का: पूर्णा भवन्ति । श्रेयोऽङ्काः चत्वारः भवन्ति। तत्र 30 अङ्कानां प्रश्नपत्रं भवति। 20 अङ्कानां सततसमग्रमूल्यांकनं विषयाध्यापक: विधास्यति।

"अ" खण्डात् + "ब" खण्डात् । तद्यथा

50 + 50 = 100

(30+ 20) + (30+ 20)

अध: प्रदत्तयो: “अ” “ब” इति द्वयो: खण्डयो: प्रतिखण्डम् एकं विकल्पं चिनुयात् ।

| | पूर्णाङ्का: | श्रेयोऽङ्का: |
|---|---|---|
| “अ” योग: शारीरिकशिक्षा च | 50 | 02 |
| अथवा | | |
| प्रौढशिक्षा | | |
| “ब” निर्देशनं परामर्शश्च | 50 | 02 |
| अथवा | | |
| जनसंख्याशिक्षा | | |
| • व्यावसायिकक्षमतोन्नयनम् (EPC-4) | 100 | 04 |
| • शैक्षणिकगतिविधय: | 50 | 02 |

# प्रथमपत्रम्
# पाठ्यचर्या विद्यालयश्च

श्रेयोऽङ्काः = 04

पूर्णाङ्का: =100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका: -

- पाठ्यचर्याया: सम्प्रत्ययमवगच्छेयु:।
- पाठ्यचर्याया: पक्षान् जानीयु:, भारतीयसन्दर्भे अनिवार्यपाठ्यक्रमस्य महत्त्वञ्च जानीयु:।
- पाठ्यचर्यानिर्माणस्य व्यापकदृढतावबोधं विकासयेयु:।
- पाठ्यचर्याविकासस्य विचारान् जानीयु:।
- विद्यालयस्तरे पाठ्यचर्याविकासमवगच्छेयु:।
- पाठ्यचर्यासंयोजनस्य क्षेत्रत्त्वेन विद्यालयीयावबोधं विकासयेयु:।
- पाठ्यचर्याया: अनुप्रयोगे नवीनीकरणे च जागरूका: स्यु:।
- अध्यापकस्य अधिगन्तुश्च स्वायत्ततावबोधं जानीयु:।

अन्विति:-1 पाठ्यचर्याया: सम्प्रत्यय:

1.1 पाठ्यचर्या-अर्थ:, स्वरूपं, महत्त्वं, प्रकारा: सिद्धान्ताश्च।

1.2 पाठ्यचर्यापाठ्यक्रमयोर्मध्ये- अन्तरं विद्यालयीयशिक्षायां च तेषां महत्त्वम्।

1.3 पाठ्यपुस्तकस्य संकल्पना।

अन्विति:-2 पाठ्यचर्यापक्षा:

2.1 भारतीयसन्दर्भे अनिवार्यपाठ्यक्रमस्य योजना महत्त्वं च।

2.2 विविधस्तरेषु पाठ्यचर्या- राष्ट्रियस्तरे राज्यस्तरे च।

अन्विति:-3 पाठ्यचर्याया: निर्धारकतत्त्वानि

3.1 सामाजिक-राजनीतिक-सांस्कृतिक-भौगोलिक-आर्थिकविविधता: शैक्षिकदृष्टिश्च।

3.2 सांस्कृतिकाभिमुखीकरणं राष्ट्रियप्राथमिकता:।

**अन्वित:-4 पाठ्यचर्याविकास: प्रक्रिया च**

4.1 पाठ्यचर्याविकासस्य विविधोपागमा:।

4.1.1 विषयकेन्द्रित:

4.1.2 पर्यावरणाधारित:

4.1.3 व्यावहारिक:

4.1.4 क्षमताधारितश्चेति

4 .2 पाठ्यचर्यानिर्माणस्य प्रक्रिया।

**सन्दर्भग्रन्था: (Reference Books)**


1. पाठक, आर.पी.; पाठ्यचर्या निर्देशन एवं तुलनात्मक शिक्षा का आधार, कनिष्क पब्लिशर्स, नई दिल्ली।
2. यादव, सियाराम; पाठ्यक्रम विकास, अग्रवाल पब्लिकेशन्स, आगरा।
3. वर्मा, रामपाल; शर्मा रमेश; पाठ्यक्रम शिक्षण कला एवं मूल्यांकन, विनोद पुस्तक मन्दिर, आगरा।
4. गुप्ता, रेनु; पाठ्यक्रम एवं विद्यालय प्रबंधन, दोआबा बुक हाउस, दिल्ली।
5. मिश्रा, एल.एन.; शिक्षा एवं शिक्षण सिद्धान्त, विनोद पुस्तक मन्दिर, आगरा।
6. अग्रवाल, के.सी.; शिक्षा सिद्धान्त, आर.एस.ए. इण्टरनेशनल, आगरा।

# द्वितीयपत्रम्
# पर्यावरणशिक्षा

श्रेयोऽङ्काः = 04

पूर्णाङ्का: =100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- पर्यावरणस्य महत्त्वमवगच्छेयु:।
- पर्यावरणप्रदूषणस्य तन्नियन्त्रणस्य च ज्ञानं प्राप्नुयु:।
- स्वास्थ्यस्य सुरक्षाया: विषये जानीयु:।
- पर्यावरणसम्बद्धसमस्यानां तासां कारणानां निदानानाञ्च ज्ञानं प्राप्नुयु:।
- पर्यावरणसद्भावत्वेन जीवनार्थं छात्रेषु अभीष्टदृष्टिकोणविकासे शिक्षाया: भूमिकामवगच्छेयु:।
- पर्यावरणसंरक्षणाय उत्तरदायित्वबोधस्य विकासमवगच्छेयुरिति।

अन्विति:-1 पर्यावरणशिक्षा

1.1 पर्यावरणशिक्षा - स्वरूपं, प्रकृति: क्षेत्रञ्च।

1.2 पर्यावरणशिक्षाया: महत्त्वम् उद्देश्यानि च।

1.3 संस्कृतवाङ्मये पर्यावरणम्।

1.4 पर्यावरणसम्बन्धितानि प्रमुखसम्मेलनानि।

अन्विति:-2 मानव: पर्यावरणं च

2.1 मानवपर्यावरणयो: सम्बन्ध:।

2.2 पारिस्थितिकी- सम्प्रत्यय:, घटका: प्रकाराश्च।

2.4 स्वस्थ्यपर्यावरणं मानवसमाजश्च।

2.5 पर्यावरणीयजागरूकताया: प्रसार: प्रचारविधयश्च।

अन्विति:-3 स्वस्थपर्यावरणं संरक्षणोपायाश्च

3.1 पर्यावरणसंरक्षणस्य आवश्यकता ।

3.2 जलप्रकाशप्रदूषणकारणानि निवारणोपायाश्च।नाभिकीय-ध्वनि-वायु-भूमिसुरक्षायाः स्वस्थपर्यावरणस्य च सम्प्रत्ययः।

3.3 मृदासंरक्षणम्।

3.4 रोगनियन्त्रणात्मकं प्रबन्धनम्।

**अन्विति:-4 पर्यावरणशिक्षणविधय:**

4.1 व्याख्यानविधि:,कथाविधि:,क्रीडाविधि:, प्रायोजनविधि: भूमिकानिर्वाहविधि: च।

4.2 पर्यावरणशिक्षा पाठ्यसहगामिक्रियाश्च।

4.3 प्राचीनभारते पर्यावरणसंरक्षणोपाया:।

4.4 पर्यावरणशिक्षायाम् आधुनिकप्रविधीनां प्रयोगः।

**सन्दर्भग्रन्था: (Reference Books)**


1. पाणिग्राही निर्मला; पर्यावरणशिक्षा, ओजस्वी प्रकाशन, पुरी
2. पंडा 2019 ,दिल्ली ,ज्ञानभारती पब्लिकेशन्स ,पर्यावरणशिक्षा ;बिचित्ररंजन ,
3. मित्तल, सन्तोष एवं अग्रवाल, मीनू; 21वीं सदी में पर्यावरण एवं पर्यावरणशिक्षा, आर. एल. बुक डिपो, मेरठ, 2010
4. गोपाल, एम.के.; पर्यावरणशिक्षा, विनोद पुस्तक मन्दिर, आगरा, 1997
5. शर्मा, आर.ए.; पर्यावरण शिक्षा, आर.एल. बुक डिपो, मेरठ
6. पूजा, भारती; पर्यावरण समस्या एवं समाधान, न्यू भारत पब्लिकेशन्स, सुभाष रोड, रोहतक
7. वशिष्ठ, के; पर्यावरणशिक्षा, यूनिवर्सिटी बुक हाउस, जयपुर
8. उपाध्यक्ष, राधावल्लभ; पर्यावरण शिक्षा, विनोद पुस्तक मन्दिर, आगरा, 1998

# तृतीयपत्रम्
# समावेशात्मिका शिक्षा

श्रेयोऽङ्काः = 04

पूर्णाङ्का:= 100

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- समावेशात्मकविद्यालयनिर्माणे अपेक्षितानां गतिविधीनाम् अवगमने समर्था: भवेयु:।
- शैक्षिकरूपरेखाया: सन्दर्भे अशक्तताया: समावेशनस्य च परिज्ञाने समर्था: भवेयु:।
- प्रतिभागिताया: अधिगमस्य च विद्यमानावरोधेभ्य: परिचिता: भवेयु:।
- राज्यनीतिपत्रेषु विशिष्टानाम् अधिगमोपलब्धे: अन्वेषणे अवगमने च समर्था: भवेयु:।
- विविधावश्यकतायुता: बालानां सन्दर्भे राष्ट्रियान्ताराष्ट्रियप्रतिवचनानामवगमने समर्था: भवेयु:।

अन्विति:-1 समावेशात्मिका शिक्षा

1.1 समावेशात्मकशिक्षाया: सम्प्रत्यय:, विकासक्रमः दर्शनञ्च।

1.2 विशिष्टशिक्षा, एकीकृतशिक्षा, समावेशात्मकशिक्षा इत्येतासु मिथ: भेद:।

अन्विति:-2 विविधावश्यकतायुता: बाला:

2.1 विविधावश्यकताया: सम्प्रत्यय:।

2.2 शिशो: अधिगमकाठिन्यानां बाधानाञ्च ज्ञानम्।

अन्विति:-3 विशिष्टाः बालाः

3.1 इन्द्रियसम्बद्धा: - श्रवणदृश्यशारीरिकाक्षमतानां परिभाषा: विशेषताश्च।

3.2 बुद्धिसम्बद्धा:- प्रतिभाशालिन:, मन्दिताः मानसिकाक्षमा: इत्यादीनां परिभाषा: विशेषताश्च। एतेषां शिक्षाव्यवस्था।

3.3 विकास:- मूढता, मस्तिष्कीयाघात: अधिगमाक्षमता च।

3.4 सामाजिकसंवेगात्मकसमस्या:।

**अन्विति:-4 समावेशात्मकशिक्षायै सन्नाह:**

4.1 समावेशात्मकविद्यालयस्य सम्प्रत्यय:- संसाधनानि उपलब्धता च, मानवसंसाधनानि, अक्षमताभिवृत्तय: सम्पूर्णविद्यालयोपागमश्च।

4.2 कक्ष्यायां विशेषावश्यकतानां पूर्तये अपेक्षिता: सहकारिसेवा:-विशिष्टशिक्षक:, विशिष्टोपचारक:, शारीरिकोपचारक: वृत्त्युपचारक: परामर्शक: च।

4.3 अधिगन्तु: मैत्रीपूर्णमूल्याङ्कनप्रक्रियाया: विकास: अनुप्रयोगाश्च।

4.4 माध्यमिकशिक्षामण्डलानां परीक्षार्थं विविधसौविध्यानि।

**सन्दर्भग्रन्था: (Reference Books)**


1. मिश्र:, लोकमान्य:, समावेशात्मिका शिक्षा, मृगाक्षीप्रकाशनम्, लखनऊ,202 2
2. सक्करवाल:,लीना प्रो,समावेशात्मकशिक्षा , केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली2022 ,
3. विर्क, जसवन्त; अलका अरोड़ा; समावेशी शिक्षा के आधार, टी.एफ.सी. पब्लिकेशन्स, पटियाला।
4. यादव, एस.एस; यादव, सुधा; समावेशी शिक्षा, टण्डन पब्लिशर्स, लुधियाना।
5. अरविन्द कुमार; समावेशित शिक्षा, सोमदत्त पब्लिकेशन्स, 2017
6. Vijayan, P and Geetha (Ed. By Mittal, S.R., 2006) Integrated and Inclusive Education: DSE (vi) Manual, New Delhi.
7. Jha, M.; (2002) Inclusive Education for all : Schools without Walls, Chennai, Heinemann Educational publishers, Multivista Global Ltd.
8. Sharma, P.L.; (2003) Planning Inclusive Education in Small Schools, R.I.E. Mysore, Bhargav,
9. Mahesh; Exceptional Children, H.P.Bhargav Book House, Agra.

# चतुर्थपत्रम्
# मूल्यशिक्षा  मानवाधिकारशिक्षा च

श्रेयोऽङ्काः = 04

पूर्णाङ्का: = 100

**उद्देश्यानि-**

**अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-**

- मूल्यानां सम्प्रत्ययान् अवगन्तुं योग्या: भवेयु:।
- जनतन्त्रम्, साम्यवादिता इत्यादीनां शैक्षिकमूल्यानि अवगच्छेयु:।
- भारतीयसंस्कृते: मानवमूल्यानां च ज्ञानं प्राप्नुयु:।
- मानवाधिकारस्य सम्प्रत्ययसन्दर्भे- जागरूका: भवेयु:।
- मूल्यशिक्षायां मानवाधिकारसन्दर्भे राष्ट्रिय-अन्ταराष्ट्रियप्रयासै: परिचिता: स्यु:।
- मूल्यशिक्षायाः मानवाधिकारस्य च शिक्षणविधीनाम् अवबोधने क्षमा: भवेयु:।
- मूल्यशिक्षायाः मानवाधिकारस्य च जागरूकताप्रचाराय अध्यापकविद्यालययो: भूमिकाम् अवगच्छेयु:।

**अन्विति:-1 मूल्यशिक्षा**

1.1  मूल्यशिक्षाया: स्वरूपम्आवश्यकता , महत्त्वं क्षेत्रञ्च।

1.2  नैतिकताया: सम्प्रत्यय: नैतिकशिक्षा च।

1.3  प्रजातन्त्र-साम्यवादयोः शैक्षिकमूल्यानि।

1.4  मूल्यनिर्माणे पाठ्यसहगामिक्रिया:।

**अन्विति:- 2 मानवाधिकार:**

2.1 मानवाधिकाराणां सम्प्रत्यय:।

2.2  भारतीयसंविधानं मानवाधिकाराश्च।

2.3  आधारभूतमानवाधिकारा:- स्वतन्त्रता, समानता, शिक्षा, सुरक्षा अभिव्यक्ति: च।

अन्विति:-3 मानवाधिकाराणां संरक्षणाय प्रयासा:

3.1 राष्ट्रियमानवाधिकारायोग: तदुद्भव: प्रकार्याणि क्षेत्रञ्च।

3.2 राज्यमानवाधिकारायोग: तदुद्भव: प्रकार्याणि क्षेत्रञ्च।

3.3 स्त्रीणां, बालकानां, सामाजिकोपेक्षितानाञ्च विशेषाधिकारा:।

3.4 भारते मानवाधिकारान्दोलनानि।

अन्विति:- 4 मानवाधिकारशिक्षा

4.1 बालानां विशेषसन्दर्भे-अधिगन्तृशिक्षकयो: कर्तव्याधारिताधिकारा:।

4.2 सूचनाधिकार: (आर.टी.आई.)

4.3 मानवाधिकारजागरूकतायाः संवर्धने विद्यालयानां भूमिका।

4.4 राजाराममोहनराय, महात्मागान्धी, बी. आर्. आम्बेडकर इत्येतेषां मानवाधिकारसम्बन्धिविचारा:।

सन्दर्भग्रन्था: (Reference Books)


1. कछवाहः, विजयपालः; मूल्यशिक्षणम् दिव्या प्रकाशिनी, भुवनेश्वर, 2015
2. गुर्जरः,भग्यसिंहः; मानवाधिकारशिक्षा - तीरतरंङ्ग प्रकाशनम् , भुवनेश्वरम्, 2017
3. मिश्रः, ओमनारायणः; मूल्य शिक्षा की अवधारणाएं ,प्रकाशिनी भुवनेश्वरदिव्या - 2013
4. शर्मा, परमेश ,:भारतीयसन्दर्भे मानवाधिकारशिक्षा फारोस बुक प्राइवेट लिमिटेड- 2020 , ,
5. माथुर, टी.बी., मूल्यपरक शिक्षा, एक्सटेंशन सर्विस डिपार्टमेण्ट, रिजनल कॉलेज ऑफ एज्यूकेशन, अजमेर।
6. पाण्डेय, रामशकल; मिश्र करुणाशङ्कर; मानवाधिकार और मूल्य शिक्षण, विनोद पुस्तक मन्दिर,आगरा।
7. शर्मा, राजेन्द्र, नैतिक मूल्यशिक्षा, गुरुजी बुक कम्पनी, जयपुर।
8. शर्मा, आर.ए., मानव मूल्य एवं शिक्षा, आर. लाल बुक डिपो, मेरठ।
9. Gupta, N.L., Value Education, Theory & Practice, Krishna Brother, Ajmer.
10. Gupta, K.M., Training cum-Research Project in Value, Orientation, Value Analysis model, DTE, SE & ES, NCERT, New Delhi.
11. Ruhela, S.P., Human Values & Education, Sterling Publishers Pvt. Ltd., New Delhi.
12. Jasta, Hari Ram, Spiritual Values and Education, Prabhat Prakashan, Delhi.

## पञ्चमपत्रम्– (वैकल्पिकः) “अ“ खण्डः

## प्रतिखण्डम् एकः विषयः चेयः
## योगः शारीरिकशिक्षा च

श्रेयोऽङ्कौ = 02

पूर्णाङ्का := 50

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- योगस्य सम्प्रत्ययं जानीयु:।
- शारीरिकशिक्षाया: शिक्षाक्षेत्रेऽवदानं, महत्त्वञ्च जानीयु:।
- शारीरिकस्वस्थताया: सम्प्रत्ययमवगच्छेयु:।
- क्रीडानां, शारीरिकव्यायामानां च महत्त्वम् अवगच्छेयु:।
- स्वास्थ्योपागमानां, विद्यालयस्वास्थ्यकार्यक्रमाणां परिचयं प्राप्नुयु:।

अन्विति:-1 योगस्य स्वरूपम्

1.1 अर्थ:, महत्त्वम् भारते च परम्परा ।

1.2 पातञ्जलयोग: - अष्टौ अङ्गानि, तेषां च महत्त्वम्।

1.3 आसनानां प्रकारा: अभ्यासश्च।

1.4 जीवनपद्धतिरूपेण योग:।

अन्विति:-2 शारीरिकशिक्षाया: विकास:

2.1 शारीरिकशिक्षाया: स्वरूपम्, महत्त्वं क्षेत्राणि च।

2.2 शारीरिकशिक्षाया: लक्ष्यमुद्देश्यानि च।

2.3 शिक्षायां शारीरिकशिक्षाया: योगदानम्।

2.4 छात्रेषु शारीरिकशिक्षां प्रति जागृतिविकासाय विद्यालयस्य भूमिका।

अन्विति:-3 स्वास्थ्यशिक्षा क्रीडा च

3.1 स्वास्थ्यसम्प्रत्यय आयामाश्च।

3.2 स्वास्थ्यसंरक्षणे विद्यालयेषु क्रीडानां प्रतिस्पर्धानां च आयोजनम्।

सन्दर्भग्रन्था: (Reference Books)


1. शर्मा, परमेशः, योगः स्वास्थ्यं शारीरिकशिक्षा च, शिवालिक प्रकाशन, दिल्ली
2. शर्मा,गजेन्द्रः ,शारीरिकशिक्षा एवं स्वास्थ्यशिक्षा, भव्या प्रकाशन, जोधपुर, 2007
3. वर्मा, के.के., स्वास्थ्य शिक्षा एवं शारीरिक शिक्षा, दीपक पब्लिशर्स, ग्वालियर, मध्यप्रदेश, 2001
4. सिंह, अजमेर; बरार, आर.एस; शारीरिक शिक्षा स्वास्थ्य शिक्षा एवं खेलकूद, कल्याणी पब्लिशर्स, नई दिल्ली, 2009
5. पाठक तथा उपाध्याय; स्वास्थ्य एवं शारीरिक शिक्षा, अभिषेक प्रकाशन, पीतमपुरा, नई दिल्ली
6. भारद्वाज, ईश्वर; सरल योगासन, सत्यं पब्लिशिंग हाउ स, नई दिल्ली
7. त्रिपाठी, रूद्रदेव; अभिनव क्रीडा तरङ्गिणी, श्री लालबहादुरशास्त्री केन्द्रीयसंस्कृतविद्यापीठ, नई दिल्ली, 1982
8. बघेला, हेतसिंह; स्वास्थ्य शिक्षा एवं शारीरिक शिक्षा शिक्षण, राजस्थान प्रकाशन, त्रिपोलिया बाजार, जयपुर
9. गोपाल, उषा, स्वास्थ्य शिक्षा, स्पोर्ट्स पब्लिकेशन्स, अंसारी रोड़, दरियागंज, नई दिल्ली
10. शिन्दे, बी, एस; शारीरिक शिक्षा के मौलिक आधार, स्पोर्टस् पब्लिकेशन्स, दरियांगज, नई दिल्ली
11. गोरे, सी.एस; शारीरिक शिक्षा एवं खेलकूद में प्रबन्धन, स्पोर्टस् पब्लिकेशन्स, दरियागंज, नई दिल्ली

## पञ्चमपत्रम् - (:वैकल्पिक) ‘‘अ‘‘ खण्डः
## प्रतिखण्डम्  एकः विषयः चेयः
# प्रौढशिक्षा

श्रेयोऽङ्कौ = 02

पूर्णाङ्का: = 50

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- प्रौढशिक्षाया: महत्त्वम्, आवश्यकताञ्च अवगच्छेयुः।
- विभिन्नानां शैक्षिक-सामाजिकसंस्थानां प्रौढशिक्षायां भूमिकां जानीयु:।
- जनसञ्चारमाध्यमस्य प्रौढशिक्षायाः भूमिकां परिजानीयु:।
- राष्ट्रियस्तरे अन्ताराष्ट्रियस्तरे च प्रौढशिक्षाया: क्रियान्वयनयोजनाया: परिचयं प्राप्नुयु:।

**अन्विति:-1 प्रौढशिक्षा**

1.1 प्रौढशिक्षा - सम्प्रत्यय: महत्त्वम् उद्देश्यानि च।

1.2 प्रौढशिक्षणम् - सम्प्रत्यय:।

**अन्विति:-2 राष्ट्रियविकास: प्रौढशिक्षा च**

2.1 भारते स्वतन्त्रतापूर्वकाले, तदनन्तरकाले च प्रौढशिक्षा।

2.2 क्रीष्टो 1978 वर्षीयायां  राष्ट्रिययोजनायां प्रौढशिक्षा।

2.3 क्रीष्टो 1986 वर्षीयायां शिक्षानीतौ प्रौढशिक्षा।

**अन्विति:-3 प्रौढशिक्षकाणां प्रशिक्षणम्**

3.1 प्रौढशिक्षक: - विशेषता: उत्तरदायित्वानि च।

3.2 प्रौढशिक्षकाणां प्रशिक्षणम्।

3.3 प्रौढशिक्षणे विधय:-गोष्ठी, चर्चा, प्रदर्शनं परिभ्रमणञ्च।

सन्दर्भग्रन्था: (Reference Books)


1. शर्मा, सुदेश कुमार , प्रौढशिक्षा, जयपुर, दीपमाधव प्रकाशन।
2. पाण्डेय, रामशकल, मिश्र, करुणाशङ्कर, प्रौढ शिक्षा, विनोद पुस्तक मन्दिर, आगरा।
3. ओड, लक्ष्मीलाल के., शिक्षा के नूतन आयाम, जयपुर, राजस्थान हिन्दी ग्रन्थ अकादमी।
4. द्विवेदी, जगदीश्वर, प्रौढ साक्षरता कार्यक्रम:, नेहरू युवा केन्द्र, संगठन इलाहाबाद
5. शिवपुरी, पी.एन्. राष्ट्रिरप्रौढशिक्षाकार्यक्रम : प्रौढ शिक्षक प्रशिक्षण, साक्षरता निकेतन लखनउ
6. प्रेरे, पाओलो; प्रौढ साक्षरता (अनुवादक : जबरीमल्ल पारख), ग्रन्थ शिल्पी, नई दिल्ली
7. Sharma, S.N.; Adult Education and Social Growth, Kanishka Publishers, New Delhi.

# पञ्चमपत्रम् (वैकल्पिक:) - 'ब' खण्डः
## प्रतिखण्डम् एक: विषय: चेय:
## निर्देशनं परामर्शश्च

श्रेयोऽङ्कौ = 02

पूर्णाङ्का: = 50

उद्देश्यानि -

अमुं पाठ्यक्रमम् अधीत्य छात्राः-

- निर्देशनस्य सामान्यपरिचयं प्राप्नुयुः।
- निर्देशस्यार्थम्, प्रकृतिं क्षेत्रं च जानीयुः।
- दैनिकजीवने निर्देशनस्य महत्त्वम्, अनुप्रयोगं च अवगच्छेयुः।
- शैक्षिकनिर्देशन-व्यावसायिकनिर्देशयोर्मध्ये भेदं जानीयुः।
- संस्थानां सर्वेषु स्तरेषु निर्देशकार्यक्रमाणां वर्गीकरणं, संचालनं चावगच्छेयुः।
- निर्देशने परामर्शे च सामान्योपायानां क्रियान्वयने समर्थाः स्युः।

अन्वितिः- 1 निर्देशनम्

1.1 निर्देशनस्य सम्प्रत्ययः ।

1.2 निर्देशनप्रकाराः- शैक्षिकनिर्देशनं, व्यावसायिकनिर्देशनं वैयक्तिकनिर्देशनं च।

1.3 निर्देशनसिद्धान्ता: ।

अन्वितिः-2 परामर्शः

2.1 परामर्शस्य सम्प्रत्ययः ।

2.2 परामर्शविधयः निदेशात्मकपरामर्शः अनिदेशात्मकपरामर्शश्च।

2.3 उत्तमपरामर्शकस्य गुणाः।

अन्वितिः-3 निर्देशनपरामर्शयोः प्रयुक्तानि मनोवैज्ञानिकपरीक्षणानि

3.1 मनोवैज्ञानिकपरीक्षणस्य आवश्यकता उद्देश्यानि च।

3.2 बुद्धिपरीक्षणं, व्यक्तित्वपरीक्षणं, रुचिपरीक्षणम् उपलब्धिपरीक्षणं चेति।

3.3 भारतीयविद्यालयेषु निर्देशनस्योपायाः स्वरूपं च ।

सन्दर्भग्रन्थाः (Reference Books)


1. प्रो.के.के.शैन्; शिक्षायां निर्देशनं परामर्शश्च, मान्यता प्रकाशन, दिल्ली, 2012
2. डा.सागरिका नन्दः; परामर्शप्रविधिः, आई.वाई.डी.पी, खोर्धा, 2019
3. डा. सुशान्तहोता; शैक्षिकनिर्देशनम्, आई.वाई.डी.पी, खोर्धा, 2014
4. डा. सुशान्तहोता; व्यावसायिकनिर्देशनम्, आई.वाई.डी.पी, खोर्धा, 2014
5. जायसवाल सीताराम; शैक्षिक एवं व्यावसायिक निर्देशन , विनोद पुस्तक मन्दिर, आगरा (उ.प्र).।
6. वर्मा, रामपाल, निर्देशन एवं परामर्श, विनोद पुस्तक मन्दिर, आगरा (उ.प्र).।
7. Bhatnagar, Asha & Gupta Nirmala; “Guidance and Counselling Theoretical Perspective”, Vikas Publishing house, New Delhi, 1999
8. Sharma, R.A., Chaturvedi, Shikha; Educational and Vocational Guidance & Counselling, Meerut, 2007
9. Bangalee, M.D., Guidance & Counselling, Sheth Publisher Mumbai, 1984
10. Mehndi Bakar; Guidance in Schools, NCERT New Delhi, 1963

## पञ्चमपत्रम् (वैकल्पिक:) - 'ब' खण्डः
## प्रतिखण्डम् एक: विषय: चेय:
## जनसङ्ख्याशिक्षा

श्रेयोऽङ्कौ = 02

पूर्णाङ्का: = 50

उद्देश्यानि-

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापका:-

- जनसङ्ख्याशिक्षाया: सम्प्रत्ययमवगच्छेयु:।
- जनसङ्ख्या-विस्फोटस्य कारणानि अवगच्छेयु:।
- भारतीयपरिप्रेक्ष्ये जनसङ्ख्याया: संरचनां स्वरूपञ्च जानीयु:।
- भारतीयपरिप्रेक्ष्ये जनसङ्ख्यागतिशीलतां जानीयुः।
- भारतीयपरिप्रेक्ष्ये जनसङ्ख्यानियन्त्रणोपायान् जानीयु:।
- जनसङ्ख्या-मानवसंसाधनयो: मिथ: सम्बन्धं जानीयुरिति।

**अन्विति:-1 जनसङ्ख्या शिक्षा**

1.1 जनसङ्ख्याशिक्षा - सम्प्रत्यय:।

1.2 जनसङ्ख्याशिक्षाया: व्याप्ति: उद्देश्यानि च।

1.3 प्राचीनभारते जनसङ्ख्याचेतना।

**अन्विति:-2 जनसङ्ख्या-समस्या:**

2.1 सामाजिकसमस्याः आर्थिकसमस्याः शैक्षिकसमस्याः नगरीकरणसमस्याः पर्यावरणसमस्याश्चेति

2.2 प्राकृतिकस्रोतस्सु स्वास्थ्ये, जीवनस्तरे च जनसङ्ख्याया: प्रभाव:।

2.3 भारतस्य परिप्रेक्ष्ये जनसङ्ख्याया: समस्या:।

**अन्विति:-3 जनसंख्यानियन्त्रणम्**

3.1 जनसंख्यानियन्त्रणार्थं भारतशासनेन प्रवर्तिता: योजना:।

3.2 भारते जनसंख्याविस्फोटपरिहारोपाया:।

3.3 भारते जनसंख्यादृष्ट्या मानवसंसाधनविकास:।

सन्दर्भग्रन्था: (Reference Books)


1. पाणिग्राही, निर्मला; जनसंख्याशिक्षा, Published by K.P. Upgata, bhubaneshwer, 2019
2. साम्बशिवमूर्ति, कम्बम्पाटि; जनसंख्याशिक्षा, महालक्ष्मी प्रकाशन, उडीसा, 2013
3. शर्मा, राधेश्याम; जनसंख्याशिक्षा शिक्षण, पुनीत प्रकाशन, जयपुर, 1999
4. मलैजा, के.सी. एवं शर्मा, रमा; जनसंख्याशिक्षा, विनोद पुस्तक मन्दिर, आगरा, 1986

# चतुर्थसत्रार्द्धम्

## व्यावसायिकक्षमतानाम् उन्नयनम् (EPC- 4)

## क्षेत्रनिष्ठकार्याणि

## Engagement with the Field

श्रेयोऽङ्काः = 04

पूर्णाङ्का: =100

(1) **शिक्षानीतिसम्बद्धाभिलेखा:** 10 अङ्का:

भारते विविधेषु आयोगेषु शिक्षानीतिषु च संस्कृतप्रस्तावानां विषये विंशतिपृष्ठात्मकं प्रतिवेदनम्।

(2) **शैक्षिकपत्रिका:** 10 अङ्का:

भारते विद्यमानानां शैक्षिकपत्रिकाणां परिचयपुरस्सरं कस्याश्चिदेकस्या: पत्रिकाया: विषये विंशतिपृष्ठात्मकं प्रतिवेदनम्।

(3) **योग:** 10 अङ्का:

लक्षणम्, प्रकारा:, दशसंख्याकानां योगासनानां प्रदर्शनं प्रतिवेदनञ्च।

(4) **विभागीयपत्रिका -** 10 अङ्का:

विभागे प्रचलितपत्रिकायै प्रकाशनार्हस्य शैक्षिकलेखस्य रचनाया: समर्पणम्।

(5) **आदर्शसाक्षात्कार: -** 10 अङ्का:

साक्षात्कारस्य लक्षणम्, महत्त्वं भेदांश्च प्रदर्श्य आदर्शसाक्षत्कारसम्पादनम्।

(6) **शैक्षिकचलचित्रदर्शनं मूल्याङ्कनं च -** 10 अङ्का:

विभागपक्षत: प्रदर्शितं संस्कृत/हिन्दी/आङ्ग्ल-शैक्षिकचलचित्रं वीक्ष्य तद्विषयेप्रतिवेदनसमर्पणम्।

(7) **व्यक्तित्वविकासशिविरम् -** 10 अङ्का:

विद्यालयीयबालानां कृते शास्त्रसम्मताया: संस्कृतवाङ्मयसमन्विताया‍श्च दिनचर्याया: तेषां स्वास्थ्यरक्षणाय निर्धारणम्। तत्र आहार-व्यवहार-शुचिताद्यंशान् समन्वितान् विधाय प्रतिवेदनसमर्पणम्। एतदर्थं व्यक्तित्वविकासशिविरसञ्चालनानुभविनां मार्गदर्शनं पञ्चसु कालांशेषु भवितुमर्हति।

(8) **अनुवादकौशलाभ्यास: -** 10 अङ्का:

वाक्यानाम्, श्लोकानां गद्यखण्डानाञ्च अनुवादलेखनाभ्यासबलेन अनुवादं कारयित्वा मूल्याङ्कनं विधेयम्।

(9) **सुभाषितकण्ठस्थीकरणम् -** 10 अङ्का:

पञ्चाशत्सुभाषितश्लोकानाम् अर्थज्ञानपूर्वकं कण्ठस्थीकरणम्।

(10) **कोशग्रन्थावलोकनम्-** 10 अङ्का:

संस्कृते विद्यमानानां कोशग्रन्थानां परिचयपुरस्सरं विविधकोशग्रन्थेषु विंशते: पदानां पर्यायशब्दान् विज्ञाय प्रतिवेदनरूपे प्रस्तुतीकरणम्।

## व्यावसायिकक्षमतोन्नयनगतिविधीनाम् आयोजनस्य मूल्याङ्कनस्य च क्रम:

- गतिविधि: एकत: चत्वारि पर्यन्तं (1 -4 ) सत्रार्द्धस्य प्रथममासे समायोज्य मूल्याङ्कनं च विधाय सम्बद्धप्राध्यापका: विद्याशाखाया: अध्यक्षाय परिणामान् समर्पयिष्यन्ति ।
- गतिविधि: पञ्चत: षट्पर्यन्तं (5 -6 ) सत्रार्द्धस्य द्वितीयमासे समायोज्य मूल्याङ्कनं च विधाय सम्बद्धप्राध्यापका: विद्याशाखाया: अध्यक्षाय परिणामान् समर्पयिष्यन्ति ।
- गतिविधि: सप्तत: अष्टपर्यन्तं (7 -8 ) सत्रार्द्धस्य तृतीये मासे समायोज्य मूल्याङ्कनं च विधाय सम्बद्धप्राध्यापका: विद्याशाखाया: अध्यक्षाय परिणामान् समर्पयिष्यन्ति ।
- गतिविधि: नवत: दशपर्यन्तं (9 -10 ) सत्रार्द्धस्य चतुर्थे मासे समायोज्य मूल्याङ्कनं च विधाय सम्बद्धप्राध्यापका: विद्याशाखाया: अध्यक्षाय परिणामान् समर्पयिष्यन्ति ।

# शैक्षणिकगतिविधयः

श्रेयोऽङ्कौ = 02

पूर्णाङ्का: = 50

1.योगासनाभ्यासः श्रेयोऽङ्क: = 01

अङ्का:= 25

सत्रार्द्धस्य द्वितीयमासं यावत् योगासनानां दशदिवसात्मकं प्रशिक्षणपुरस्सरं केषाञ्चन दशसंख्याकानाम् आसनानां प्रदर्शनस्य मूल्याङ्कनं विधाय सम्बद्धप्राध्यापका: विद्याशाखाया: अध्यक्षाय परिणामान् समर्पयिष्यन्ति ।

2. सरलमानकसंस्कृताधारितं सर्वेक्षणात्मकम् अनुवादात्मकं च परियोजनाकार्यम्

श्रेयोऽङ्क: = 01

अङ्का:= 25

- सरलमानकसंस्कृतेन निबद्धानां रचितानां संस्कृतभाषापरिचयपुस्तकानां, कथापुस्तकानाम्, उपन्यासपुस्तकानां, पठनसामग्रीणां च सर्वेक्षणम्

स्रोतः- 1. संस्कृतभारती

2. संस्कृतसंबर्धनप्रतिष्ठानम्, नवदेहली

3. संस्कृताकदम्यः(Sanskrit Academies)

4. साहित्य-अकादमी

- विभिन्नसमाचारपत्रेषु प्रकाशितानां सुविचाराणां संग्रहणम्, " जीने की राह"- इत्यादिशीर्षकमाध्यमेन प्रकाशितानां गद्यभागानां संग्रहणं सरलसंस्कृतेन अनुवादलेखनं च।

  तत्तत्परिसरक्षेत्रे यानि समाचारपत्राणि प्रादेशिकभाषासु प्रकाश्यन्ते तेभ्यः अपि संग्रहणं भवितुमर्हति।

एतस्य गतिविधेः सत्रार्द्धस्य चतुर्थमासपर्यन्तम् आयोजनं मूल्याङ्कनं च विधाय सम्बद्धप्राध्यापका: विद्याशाखाया: अध्यक्षाय परिणामान् समर्पयिष्यन्ति ।